॥ ओ३म् ॥
‘मूकं करोति वाचालं, पंगुं
लंघयते गिरिम् ।
यत्कृपा तं अहं वन्दे,
परमानन्द-माधवम् ॥’

‘अहिंसा सत्यवचन
मानृशंस्यं दमो घृणा ।
एतत् तपो विदुः धीराः न
शरीरस्य शोषणम् ।’

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
अहिरेव ह्यहेः पादान्
पश्यतीति नः श्रुतम्।
तद्वन्मूर्तिषु मूर्तिस्थं
ज्ञेयं ज्ञानेन पश्यति ॥
(महाभारत शांतिपर्व – २०३/१३)
यत् स्यादहिंसासंयुक्तं
स धर्म इति निश्चयः।
अहिंसार्थाय भूतानां
धर्मप्रवचनं कृतम्॥
(महाभारत, कर्ण पर्व – ६९/५७)

卐 वर्षम्-१४ 卐 अंकः-२२ (३३४) नवदेहली 卐 १६ मईमासः २०२५तः ३१ मईमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८२ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२५ 卐 पृष्ठम्-८


## ‘यावत् संस्कृतं समृद्धं भविष्यति, तावत्यः एव भारतीयभाषाः सशक्ताः भविष्यन्ति’-अमितशाहः

नवदिल्ली (धीरजमैठाणीः)। दिल्लीविश्वविद्यालयस्य क्रीड़ापरिसरे स्थिते सभागारे आयोजिते संस्कृतसंभाषणशिविरस्य समारोपसमारम्भे केन्द्रगृहमन्त्री अमितशाहः भाषमाणः अवदत्–‘यावत् संस्कृतं समृद्धं भविष्यति, तावत् एव भारतीयभाषाः सशक्ताः भविष्यन्ति।’ सः अवदत् यत् संस्कृतं सर्वासां भारतीयभाषाणां जननी अस्ति। अमितशाहः संस्कृतभारती, केन्द्रीयसंस्कृतविश्वविद्यालयम्, दिल्लीसंस्कृतअकादमी



च एतेषां संयुक्तसंस्थायाः तत्त्वावधानस्य अन्तर्गतं आयोजितानां १००८ संस्कृतसंभाषणशिविराणां समारोपसमारम्भं सम्बोधितवान्। अत्र २३ अप्रैलतः ३ मईपर्यन्तं आयोजितेषु शिविरेषु १७००० अतिवृत्ताः प्रतिभागिनः संस्कृतसंभाषणस्य प्रशिक्षणं प्राप्तवन्तः। मुख्यातिथिरूपेण भाषमाणः अमितशाहः अवदत्–‘संस्कृते योगः, गणितम्, ज्योतिःशास्त्रम्, विज्ञानम्, पर्यावरणं च अपि सर्वं ज्ञानं निहितम् अस्ति। वयं अस्य दैवीयज्ञानस्य ‘आविष्कर्तारः न स्मः। वेदेषु, उपनिषत्सु च कस्यापि नाम न दृश्यते–एतत् सर्वं ज्ञानं ईश्वरप्रदत्तम् अस्ति, यः समस्तविश्वस्य हिताय लभ्यम् अभवेत्।’ सः उक्तवान् यत् संस्कृतं केवलं भाषा न, अपितु भारतस्य श्रद्धा, परम्परा, सत्यं च सनातनं च प्रतीकः अस्ति। एषा ज्ञानविवेकयोः भाषा, यया सह सहस्रवर्षपर्यन्तं विविधविषयेषु गम्भीरचिन्तनं रचनाच च साधितम्। तेन उक्तं यत् वेदोपनिषदादिषु निहितं ज्ञानं समग्रं लोके प्रसारयितुं अस्माकं उत्तरदायित्वम् अस्ति। संस्कृतभारती १९८१ तमे

शेषभागः:तृतीयेपुटे

## पतञ्जलिविश्वविद्यालयस्य, पतञ्जलि-रिसर्च-फाउण्डेशनस्य च भारतीयज्ञानप्रणालीप्रभागेन सह शैक्षिकसमन्वयाय सहमतिः

हरिद्वार। भारतस्य प्राचीनज्ञानपरम्परायाः संरक्षणाय समर्पितं विशिष्टं शोधसंस्थानं पतञ्जलिविश्वविद्यालयः तथा पतञ्जलि रिसर्च फाउण्डेशन (पीआरएफ) च भारतीयज्ञानप्रणालीप्रभागेन (IKS Division), शिक्षामन्त्रालयेन सह सहयोगाय शैक्षिकसमन्वयाय च एकस्मिन् समझौतपत्रे (MoU) हस्ताक्षरं कृतम्।

एतस्मिन् अवसरे पतञ्जलिविश्वविद्यालयस्य कुलपतिः आचार्यबालकृष्णः, IKS कार्यान्वयनसमितेः



अध्यक्षः प्रो. अनिल सहस्रबुद्धिः च हस्ताक्षरं कृतवन्तौ।

आचार्यबालकृष्णेन उक्तं यत्–‘अनेन समझौतपत्रेण पतञ्जलिविश्वविद्यालयं IKS-केंद्ररूपेण मान्यं भविष्यति, येन सह विविधविषयेषु शोधः, प्रशिक्षणम्, कार्यशालाः, सम्मेलनानि च आयोज्यन्ते।’

एवमेव पतञ्जलिविश्वविद्यालयेन च तस्य संस्थाभिः भारतीयज्ञानप्रणालीपरं यत् शोधकार्यं क्रियते, तस्य प्रकाशनं प्रसारश्च संयुक्तपरियोजनारूपेण आरभ्यते।

तेन उक्तं यत् ष्एतस्मिन् कार्ये पतञ्जलिसंस्थानानि स्वकीयाम् वैज्ञानिकशक्तिं उपयोगं करिष्यन्ति।’ IKS प्रभागः अपि भारतीयइतिहाससमर्पितं संग्रहालयं पतञ्जलिविश्वविद्यालयेन सह स्थापयिष्यति, यत्र पुरातत्त्वकला, ज्ञानसिद्धान्ताः, विज्ञानप्रमाणानि च समाविष्टानि स्युः। सः अवदत् यत्–‘अयं विश्वविद्यालयः अनुष्ठानम्, संगीतं, प्राचीनसभ्यता, भाषाः, औषधप्रणाली, शासनव्यवस्था, स्वदेशीप्रणाली च इत्यादिषु ज्ञानदस्तावेजानां संरक्षणाय IKS प्रभागं सह सहकार्यं करिष्यति।’ IKS प्रभागस्य सहयोगेन online प्रमाणपत्रपाठ्यक्रमाः अपि विश्वविद्यालयेन विकसिताः भविष्यन्ति। प्रो. सहस्रबुद्धिना उक्तम्– ‘‘IKS प्रभागः भारतीयदर्शनपरंपरायाः वैज्ञानिकमूलकशोधकार्याय पतञ्जलिसंस्थायाः सहयोगं करिष्यति।’ तेन अवदत् यत्–‘अयं प्रभागः इतिहासकेन्द्रिकं वैज्ञानिकप्रयोगशालां अपि विकसयिष्यति।’ अस्मिन् कार्यक्रमे प्रो. सूर्यनारायणमूर्तिः, प्रति-कुलपति डॉ. मयंक अग्रवालः, डॉ. वेदप्रिया आर्या च अन्ये च गणमान्यजनाः सन्निहिताः आसन्।

## काशीतत्त्वप्रकाशे काश्याः समस्तपौराणिकदेवतानां तीर्थस्थानानां च सचित्रं प्रामाणिकं निरूपणम् अस्ति

वाराणसी। १० मई, वैशाखशुक्लत्रयोदशी, २०२५, काशीहिन्दूविश्वविद्यालयस्य वैदिकविज्ञानकेन्द्रे आचार्यमाधवजनार्दनरटाटेद्वारा लिखितस्य पुस्तकस्य ‘काशीतत्वप्रकाश’ इत्यभिहितस्य विमोचनं संजातम्। तत्र मुख्यातिथित्वेन गोपालमंदिरषष्ठपीठाधीशः श्री१०८गोस्वामी श्याममनोहरमहाराजः उपस्थित आसीत्।




तथा च श्रीकाशीविश्वनाथमंदिरस्य मुख्यकार्यपालकाधिकारी श्रीविश्वभूषणमिश्रः विशेषातिथित्वेन समागतः। गोस्वामी श्याममनोहरः महाराजः अवदत् यत् काशी प्राचीनकालात् शिवभक्तानाम् तथा च वैष्णवानां च प्रियं नगरम् अस्ति। अत्र बहूनि विष्णुपीठानि स्थापितानि सन्ति। महाप्रभुवल्लभाचार्यः, गोस्वामी तुलसीदासः, सूरदासश्च काशीनगरे स्थित्वा स्वसाधनाम् अकुर्वन्, स्वीयमतप्रचारं च कृतवन्तः । अस्य ग्रन्थस्य माध्यमेन काश्याः दिव्यं महत्त्वं सामान्यजनस्य समक्षं प्रकाशितं भविष्यति।

विशेषातिथिः श्रीविश्वभूषणमिश्रः उक्तवान् यत् एतत् पुस्तकं काश्याः विशालः निधिः भविष्यति। सभाध्यक्षः वैदिकविज्ञानकेन्द्रस्य समन्वयकः संस्कृतविद्याधर्मशास्त्रसंकायस्य च प्रमुखः

आचार्यराजारामशुक्लः स्वीयाध्यक्षीयभाषणे लेखकद्वयस्य अभिनन्दनं कुर्वन् अवदत् यत् संस्कृतभाषा, पुराणानि, तीर्थस्थलानि च अस्माकं निधयः वर्तन्ते। एतेन पुस्तकेन तानि प्रति जनानां मध्ये अधिका रुचिः प्रभविष्यति। एतादृशैः कार्यैः संस्कृतभाषायाः महिमा वर्धते।

शेषभागः:द्वितीयेपुटे

## भारतीयसंस्कृत्या आधारं संस्कृतमस्ति – कुलगुरुः आचार्यः सीजी

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थस्यमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेन्द्रस्य तत्त्वावधाने शासकीयमॉडलउच्चतरमाध्यमिकविद्यालये आयोजितस्य संस्कृतसम्भाषणप्रशिक्षणस्य समापनम् अप्रैलमासस्य त्रिंशत् तमे दिनाङ्के अभवत्। समापनकार्यक्रमे मुख्यातिथिरूपेण महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य कुलगुरुः, आचार्यः विजयकुमारसीजीवर्यः उपस्थितः आसीत्। महोदयेन स्ववक्तव्ये उक्तं यत् संस्कृतभाषायाः शिक्षणेन सम्भाषणेन च विद्यार्थिनाम्



उच्चारणगतदोषाः दूरी भवन्ति तथा च तेषां सर्वांगीणविकासो अपि जायते। सतत् सम्भाषणेन भाषावर्धनं च भवति। अतः निरन्तरं संस्कृतसम्भाषणस्य प्रयासो कर्तव्यः। महोदयेन इदमपि उक्तं यत् संस्कृतस्य ज्ञानेन अन्यासु भाषासु अपि सरलतया अधिकारो प्रवर्धते। विशिष्टतिथिरूपेण उपस्थितः महर्षिपाणिनिसंस्कृतवैदिक विश्वविद्यालयस्य कार्यपरिषदसदस्येन श्रीगौरवधाकड़महोदयेन उक्तं यत् उज्जयिनी अनादिकालादैव ज्ञानस्य सनातनसंस्कृत्या च स्थली वर्त्तते। अत्र वृहदस्तरे संस्कृतसम्भाषणस्य विस्तारकार्यस्य आवश्यता प्रतीयते। महोदयेन विश्वविद्यालयस्य केन्द्रेण सञ्चाल्यमानानां प्रकल्पानां सन्दर्भे कथितः यत् विश्वविद्यालयस्य अयं प्रयासः समाजोन्मुखी वर्त्तते अनेन भारतीयसंस्कृत्या, अस्माकं शास्त्राणां च विषये जनाः परीचिताः भवेयुः। विश्वविद्यालयस्य अयं प्रयासः अभिनंदनीयः अस्ति। कार्यक्रमस्य अध्यक्षः आसीत् विद्यालयस्य प्राचार्यः

शेषभागः:द्वितीयेपुटे

# आदिशङ्कराचार्यजयन्ती-समारोहः

(वत्स-देशराज-शर्मा)

अद्य ०२/०५/२०२५ दिनाङ्के श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य पुरीस्थस्य अद्वैतवेदान्तविभागानुकूल्येन श्रीमदादिशंकराचार्यस्य जयन्ती महता साटोपेन परिपालिता । देवपूजनं वैदिकमङ्गलाचरणपूर्वकं सभा



समारब्धा। अस्यां सभायां सभापतयः आसन् स्नातकोत्तरपरिषदध्यक्षाः श्रीमन्तः प्रो.दत्तात्रेयमूर्तयः। सम्मानितातिथिरूपेण विश्वविद्यालस्यस्य भारप्राप्ताः परीक्षानियन्त्रकाः साहित्यविभागादक्षाः डॉ.वसन्तकुमारमिश्राः, मुख्यवक्तृरूपेण सर्वदर्शनविभागाध्यक्षाः डॉ.प्रदीप्तकुमारनन्दमहाभागाः, तथा संयोजिकारूपेण अद्वैतवेदान्तविभागीयाचार्याः डॉ श्रद्धाञ्जलिमहापात्राः समुपस्थिता आसन् । सभान्ते अद्वैतवेदान्तविभागीयाचार्याः डॉ.रासमणि घडाइमहोदयाः धन्यवादमर्पितवत्यः आसन् द्य अस्यां सभायां शङ्करभगवतः विषये बहुचर्चा जाता। विभागीयाः छात्राः, अन्ये सर्वदर्शनविभागीयाचार्याः डॉ अजयकुमारपाण्डे महाभागाः, ज्योतिर्विज्ञानविभागीयाचार्याः डॉ सर्वजयाशाश्वतीमहाभागाः, धर्मशाविभागीयाचार्याः डॉ प्रकाशचन्द्रमिश्रमहाभागा उपस्थिताः आसन्।

# कार्यशालायाः समापनसमारोहः

अजय कुमार आर्य

बठिंडा पञ्जाबराज्यम्। सन्तसहारा-आयुर्वेदिक-महाविद्यालयः चिकित्सालयश्च बठिण्डा तथा संस्कृतभारती पञ्जाबप्रान्तस्य इत्यनयोः संयुक्ततत्त्वाधाने आयोजिता दशदिवसीय- संस्कृतसम्भाषण- शिबिरकार्यशालायाः



समापनं समभवत्। समापनकार्यक्रमस्य शुभारम्भः अतिथिभिः दीपप्रज्ज्वलनेन एवञ्च दीपमन्त्रेण जातम्। कार्यक्रमे छात्रैः धन्वन्तरिवन्दना, स्वागतगीतम्, समूहगीतम्, स्वानुभवः, भारत-पाकिस्तान देशस्य स्थितिविषयकनाटकम्, आयुर्वेदिकनाटकम् इत्यादयः प्रस्तुत्यः सम्प्रस्तुताः। संस्कृतविभागस्य प्राध्यापकः शशिकान्त शास्त्री महोदयः कार्यक्रमस्य अतिथीनां परिचयं स्वागतं च कृतवान् । अस्मिन् कार्यक्रमे विशिष्टातिथिरूपेण अजय कुमार आर्यः संस्कृतभारती, पञ्जाबप्रान्तस्य प्रान्तसह-मन्त्री समुपस्थितः आसीत् । अतिथिरूपेण समुपस्थितः संस्कृतभारत्याः पटियालाजनपदस्य शिक्षणप्रमुखः डॉ. राहुलः आसीत्। मुख्यवक्ता रूपेण संस्कृतभारत्याः पटियालाविभागसंयोजकः डॉ. ओमनदीपः आसीत्। महोदयः आयुर्वेदशब्दस्य अर्थविषये बोधितवान् । आयुर्वेदमपि संस्कृतस्य विषयः एव अस्ति । एतदर्थं संस्कृतं पठामः, संस्कृतं पाठयामश्च इति। संस्कृतं किमर्थम् एतद्विषये अपि महोदयः सर्वान् बोधितवान् । महाविद्यालयस्य प्राचार्यः डॉ. रणजीत सोलकंरमहोदयः आगतानाम् अतिथीनां स्मृतिचिन्हं दत्वा स्वागतं कृतवान् । महाविद्यालयस्य पक्षतः सर्वे रजनी विस्तारिकायाः सम्मानं कृतवन्तः । कार्यक्रमे विभिन्नाः प्रस्तुत्यः छात्रैः छात्राभिश्च प्रस्तुताः। कार्यक्रमेस्मिन् महाविद्यालयस्य-शिक्षकाः डॉ. लवनीश पुर्थी (वाइस प्रिंसिपल) डॉ. अपर्णा, डॉ. निधि चौधरी, डॉ. निधि अरोड़ा, डॉ. पलक, डॉ. साक्षी, डॉ. अमीन, डॉ. मीनाक्षी, डॉ. रवि अरोड़ा, डॉ. मनिंदर सिंह, डॉ. श्वेता, डॉ. भुवनेहा शर्मा, डॉ. रुचि शर्मा, डॉ. सजुज्य, डॉ. भावना समुपस्थिताः आसन् । प्राचार्य महोदयः सर्वेषां धन्यवादं ज्ञापितवान्। कार्यक्रमेऽस्मिन् ७० जनाः आसन् ।

# संस्कृत-भारती-प्रतिनिधयः SCERT पंजाब-निदेशकेन सह संस्कृतशिक्षाविषये चर्चाम् अकुर्वन्

-अजयकुमारआर्य

पंजाबम्/मोहाली। संस्कृत भारती पंजाबस्य प्रतिनिधिमण्डलम् SCERT पंजाबस्य निदेशकं श्रीमती अमनिंदर कौर ब्रार इत्येन सह चर्चाम् अकरोत्, अस्मिन् चर्चायां पंजाबप्रदेशे संस्कृतशिक्षासुधारस्य आवश्यकता चर्चिता। संस्कृत भारती पंजाबस्य अध्यक्षः डॉ. वीरेंद्र कुमार अकथयत् यत् संस्कृतं, अस्य भूमेः प्राचीनभाषा अस्ति, किन्तु पंजाबस्य शिक्षानीतौ एषा उपेक्षिता। सः अवदत् यत् गतत्रिंशत्वर्षेभ्यः विद्यालय-संस्कृतपाठ्यपुस्तकानि न परिवर्तितानि तथा च संस्कृताध्यापकानां कौशलविकासाय कोऽपि शिक्षणपाठ्यक्रमः न आयोजितः। एतत्समस्यायाः समाधानाय संस्कृत भारती पंजाबेन SCERT माध्यमेन पंजाबसर्वकारम् पाठ्यक्रमस्य संशोधनं तथा आधुनिकयुगे उपयुक्तीकरणे सहाय्यं कर्तुं प्रस्तावितम्,

प्रथमपुटस्य शेषभागः **काशीतत्त्वप्रकाशे काश्याः...**

काशीतत्त्वप्रकाशस्य पुस्तकस्य रचयिता आचार्यमाधवजनार्दनरटाटे उक्तवान् यत् अस्मिन् ग्रन्थे काशीनगरस्य सर्वेषां पौराणिकदेवतानां तीर्थस्थलानां च सचित्रं प्रामाणिकं च वर्णनं वर्तते।

अतिथिनां स्वागतं वैदिकविज्ञानकेन्द्रस्य पूर्वसमन्वयकः आचार्यः उपेन्द्रकुमारत्रिपाठी, धन्यवादज्ञापनं केन्द्रस्य सहसमन्वयकः आचार्यसरोजकुमारपाढीमहोदयश्च कृतवन्तौ। तथा च कार्यक्रमस्य संचालनम् आचार्यशैलेशकुमारतिवारी कृतवान्। कार्यक्रमस्य आरम्भः श्रीसूरजदूबे इत्यस्य वैदिकमङ्गलाचरणेन दीपप्रज्वालनेन च अभवत् । अस्मिन्नवसरे आचार्यपतंजलिमिश्रः, आचार्यप्रद्युम्नशाहसिंहः, श्रीसंतोषसोलापुरकरः, आचार्यसदाशिवकुमारद्विवेदी, आचार्यः राणा पी. बी. सिंहः, आचार्यगिरिजाशंकरशास्त्री, आचार्यः हरीश्वरदीक्षितः, आचार्यः शंकरकुमारमिश्रः, डॉ पवनकुमारशास्त्री, श्रीनरेन्द्रपाण्डेयः, श्रीमानजयशर्मा, श्रीविकासमिश्रः, श्रीकेशवघिमिरे, आचार्यदयाशंकरत्रिपाठी, श्रीनारायणदत्तद्विवेदी, श्रीसन्नीपाण्डेयः, डॉ. एकदंतनारायणचतुर्वेदी तथा च अनेके प्रख्याताः जनाः छात्राश्च उपस्थिता आसन्।

प्रथमपुटस्य शेषभागः **भारतीयसंस्कृत्या आधारं संस्कृतमस्ति....**

श्रीमान्पदमसिंहचौहानवर्यः महोदयेन कथितं यत् विद्यालये आयोजितस्य संस्कृतप्रशिक्षणेन छात्राः अन्ये च प्रारंभिकरुपेण संस्कृतं वक्तुं समर्थाः दृश्यन्ते। विश्वविद्यालयेन अग्रे अपि एतादृशानां कार्यक्रमाणाम् आयोजनं नगरस्य संस्थाषु इतोपि करणीयः। अनेन संस्कृतसम्भाषणकौशलेन सह बौद्धिकस्तरे अपि वृद्धिः भविता।सदाचारस्य शिक्षा संस्कृतेन एव भवितुं शक्यते। कार्यक्रमस्य भूमिका अतिथिपरिचयः च, संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसंवर्द्धनकेंद्रस्य निदेशकेन डॉ. अखिलेशकुमारद्विवेदीमहोदयेन प्रस्तुतः। सञ्चालनं, प्रशिक्षकेण डॉ.दिनेशचौबेमहोदयेन कृतम्। आभारं डॉ.मनोजकुमारद्विवेदिना प्रगटीकृतम्। अवसरेस्मिन् छात्रैः संस्कृताधारिताः नेकाः प्रस्तुतया प्रस्तुताः। कार्यक्रमे ज्योतिजोशी, डॉ.काकुलसक्सेना, शैलेंद्रपड्या अन्ये शिक्षकाः संस्कृतानुरागिणः छात्राः च उपस्थिताः आसन्।

# महात्मनः बुद्धस्य जीवनं त्यागं शान्तिं च प्रेरयति - डॉ. रत्नेशत्रिवेदी

संवाददाता

बाँदा। अद्य महात्माबुद्धस्य जन्मदिवसस्य अवसरे उत्तरप्रदेशसंस्कृतसंस्थानं लखनऊ तथा डॉ. दयानन्द आङ्ग्लवैदिक इण्टर महाविद्यालय बाँदा इत्यस्य संयुक्ताश्रयेन डीएवी कॉलेज बांदा इत्यत्र 'महात्मा बुद्धस्य सामाजिकं दार्शनिकं च चिन्तनं' इति विषये एकदिवसीयं संगोष्ठी आयोजितम्। सरस्वती देवीं पुष्पार्पणं दीपप्रज्वलनं च कृत्वा संगोष्ठ्याः उद्घाटनं कृतम्। प्रारम्भे महाविद्यालयस्य प्राचार्यः डॉ. आनंदकुमारेण




अतिथिनां स्वागतं कृतम्। यस्यां पण्डितजवाहरलालनेहरू महाविद्यालयस्य सहायकप्राध्यापकः श्रीसूर्यकान्तमिश्रः एवं सहायकप्राध्यापकः श्रीरामसुभाषवर्मा समुपस्थितौ। स्वीये वक्तव्ये तेनोक्तं यद् भगवान् बुद्धः जनानां हिताय 'बहुजना हिताय' इति स्वधर्मस्य प्रचारार्थं देशस्य विभिन्नेषु भागेषु विदेशेषु च भिक्षवः प्रेषितवान्। विदेशेषु बौद्धधर्मस्य प्रसारणे अशोकादिसम्राट् अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म। मौर्यकालपर्यन्तं भारतात् चीन, जापान, कोरिया, मंगोलिया, बर्मा, थाईलैण्ड्, भारत-चीन, श्रीलङ्का इत्यादिषु बौद्धधर्मस्य प्रसारः अभवत्। एतेषु देशेषु बौद्धधर्मः बहुसंख्यकधर्मः अस्ति। संगोष्ठी संयोजकः वामदेवसंस्कृतमहाविद्यालयबाँदायाः सहायकविभागाध्यक्षः डॉ. रत्नेशकुमारत्रिवेदी उपस्थितः आसीत्। यः स्वभाषणद्वारा महात्माबुद्धस्य जीवने प्रकाशं कृतम्। सः स्वभाषणेन उपस्थितान् सर्वान् जनान् सम्बोधितवान्। अस्माभिः समाजेन तस्य आदर्शजीवनचरित्रात् विचारात् च शिक्षितव्यम्। कार्यक्रमस्य अन्ते संस्कृतशिक्षिका डॉ. जानकीशरणशुक्लः सर्वेभ्यः कृतज्ञतां प्रकटितवान्। संगोष्ठ्यां विद्यालयस्य प्रबन्धकः श्री हरिप्रसाद गुप्ता तथा विद्यालयस्य अनेके प्रख्यातशिक्षकाः, छात्राः, कर्मचारी च उपस्थिताः आसन्।



विशेषाध्यापकप्रशिक्षणम् अपि प्रस्तावितम् , यस्मिन् अंतरराष्ट्रीयस्तरस्य संस्कृतविद्वांसः तथा शिक्षाविदाः विद्यालयाध्यापकान् प्रशिक्ष्यन्ति। प्रतिनिधिमण्डलस्य सदस्यः डॉ. ओमन दीपः एतां चर्चां सकारात्मकम् अवदत्। सः अकथयत् यत् निदेशकः प्रशिक्षणमॉड्यूल्स इत्यस्य विषये अधिकं विवरणं याचितवती । प्रतिनिधि मण्डलः एतेभ्यः मेलनेभ्यः प्रभावयुक्तानां परिणामानाम् आशां करोति। अस्मिन्नवसरे सहमंत्री श्री अजय कुमार आर्य अपि उपस्थितः आसीत् ।

# वायुनिमित्तेन वृष्टेः परिकल्पना

**-डॉ. लक्ष्मीकान्तविमलः**

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन नवदेहलीस्थितेन अप्रैलमासस्य ३०त्तमे दिनांके बुधवासरे सायंकाले ५-७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन 'कादम्बिनी : निमित्ताध्यायविमर्शः' इति नाम्ना राष्ट्रिया संगोष्ठी आयोजिता आसीत। पण्डितमधुसूदन-ओझामहोदयस्य कादम्बिनीग्रन्थस्य तृतीयाध्यायस्य निमित्तविषये मेघरूपम्, वातः, उत्पादकः




स्थापकः, मेघः, विद्युत, गर्जितः वृष्टिश्च इति एते विषयाः समाहिताः सन्ति । तत्र निर्धारितविषये १०६ कारिकाः सन्ति। तत्कारिकायाः सारभूतं तथ्यं विद्वद्भिः प्रतिपादितम्।

श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य ज्योतिषविभागस्य आचार्यः प्रो. फणीन्द्रकुमार चौधरीमहोदयः मुख्यवक्तृरूपेण स्वकीयं व्याख्यानं कृतवान। तेनोक्तं यत् मेघगर्भस्य गर्जितः इति चतुर्थो विषयः अस्ति। वृष्टिकाले आकाशे यः शब्दः जायते तस्य कारणत्रयं विद्यते मेघेन वज्रेण वायुना शब्दः उत्पद्यते। एतत्कृते ग्रन्थे चत्वारि नामानि उल्लिखितानि सन्ति। यथा गर्जितः स्तनितः, मेघनिर्घोषः रसितश्च।

मेघाद् वज्राच्च वाताच्च शब्दस्त्रेधाऽन्तरिक्षजः।
गर्जितं स्तनितं मेघनिर्घोषो रसितं च तत्।। कादम्बिनी पृ. १३९, का.९३

प्रवर्षणाय संस्कृते वृष्टिः वर्षश्च शब्दः प्रयुज्यते। वृष्टेः अभावाय अवग्रहः शब्दः वग्रहः शब्दः च प्रयुज्यते। वृष्टेः द्वितीयं रूपं करका हिमपातः शब्दः प्रयुक्तो विद्यते।

वृष्टिर्वर्षं तद्विघातेऽवग्रहवग्रहौ समौ ।
करका हिमपाताश्च वृष्टेरेवापरा विधा।। तत्रैव, पृ. १४०, का.१०६

तिरुपतिनगरस्य राष्ट्रिय-संस्कृत विश्वविद्यालयस्य ज्योतिषएवंवास्तुविभागस्य सहायकाचार्यः, डॉ. बालकरामसारस्वतवर्यः स्वकीये सारगर्भिते वक्तव्ये कादम्बिनीग्रन्थस्य अत्यन्तं महत्त्वपूर्णस्थानं निरूपयामास। सः प्रतिपादितवान् सः मेघस्य विद्युत्स्वरूपे स्वकीयं व्याख्यानं प्रस्तुतवान्। स कथितवान् यत् विद्युतः नामसंग्रहः ग्रन्थेऽस्मिन् विद्यते। विद्युतः २९ नामानि सन्ति - विद्युत, क्षणप्रभा, मेघप्रभा, वीपा, अचिरप्रभा, ह्लादिनी, ऐरावती, चम्पा, शम्पा, सौदामिनी, तडित्, आकालिकी, शतावर्ता, जलदा, जलपालिका, क्षणांशुः, क्षणिका, राधा, चटुला, चिलमीलिका, सर्जूः, अचिररोचिः, चपला, चञ्चला, चला, शतह्लदा, असनिः, नीलाञ्जना अस्थिरा । विद्युतः एतानि नामानि एकत्ररूपेण अमोरकोशेऽपि न लभन्ते। अस्मिन् नामसंग्रहे १० नामानि अमरकोशे पठितानि सन्ति।

विद्युत् क्षणप्रभा मेघप्रभा वीपाऽचिरप्रभा ।
ह्लादिन्यैरावती चम्पा शम्पा सौदामिनी तडित्।।
आकालिकी शतावर्ता जलदा जलपालिका ।
क्षणांशु क्षणिका राधा चटुला चिलमीलिका।।
सर्जूरचिररोचिश्च चपला चञ्चला चला।
शतह्लदाऽशनिर्नीलाञ्जना च तडिदस्थिरा।। तत्रैव, पृ. १३७, का.७२-७४

केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य ज्योतिषविभागस्य सहायकाचार्यः डॉ. भूपेन्द्रकुमारपाण्डेयमहोदयः कथितवान् यत् शीतकाले दिग्गजजातेः मेघस्य हिमस्य वृष्टिः भवति। मेघस्य अन्यानि नामानि सन्ति- पुष्करः, आवर्तः, संवर्तः, द्रोणश्च। यः मेघः कष्टपूर्वकेण वृष्टिं करोति स मेघः पुष्करः अस्ति। यः मेघः वृष्टिं न करोति स मेघः आवर्तः अस्ति। यः मेघः अधिकां वृष्टिं करोति स मेघः संवर्तः अस्ति। या वृष्टिः सस्याय उपयोगिनी भवति तस्याः वृष्टेः नाम द्रोणः अस्ति।

हिमवृष्टिं तु कुर्वन्ति शीतकाले हि दिग्गजाः।
पुष्करावर्तसंवर्तद्रोणाः स्युर्मेघजातयः।।
पुष्करो दुष्करोदः स्यादावर्तो निर्जलो घनः।
बहूदकस्तु संवर्तो द्रोणः सस्यप्रपूरकः।। तत्रैव, पृ. १३५, का.४२-४३

कामेश्वर-सिंह-दरभंगा-संस्कृत-विश्वविद्यालयस्य ज्योतिषविभागस्य सहायकाचार्यः डॉ. वरुणकुमारझावर्यः वक्तृरूपेण विषयस्य उद्घाटनं कृतवान। मेघः वृष्टिहेतोः गर्भं धारयति। मेघस्य गर्भधारणं पञ्चप्रकारेण भवति। ते सन्ति वायुः, मेघः, विद्युत् , गर्जितः वृष्टिश्च। महावातः झञ्झावातः तेषाम् एव नाम अस्ति।

गर्भरूपाणि वाताभ्रःविद्युत्स्तनित-वृष्टयः।
एषां भेदा महावाताझञ्झावातादयः पृथक्।। तत्रैव, पृ. १३१, का.४

जवाहर-लाल-नेहरू-विश्वविद्यालयस्य संस्कृतएवंप्राच्यविद्याध्ययनसंस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लमहोदयः कार्यक्रमस्यः अध्यक्षः आसीत् । सः कथितवान् यत् अद्य यः निमित्ताध्यायविषयः वर्तते। अस्मात् अध्यायात् पूर्वं मासिकाध्यायमाध्यमेन मेघस्य गर्भनिर्धारणस्य नियमः प्रतिपादितः अस्ति। तत्र वैशाखमासस्य अक्षयतृतीयातिथिक्रमे शकुनपरीक्षा, अमत्रपरीक्षा, काकपरीक्षा, बिम्बपरीक्षा, धान्यपरीक्षा, लोष्ठपरीक्षा, नक्षत्रपरीक्षा, गर्भपरीक्षा, वायुपरीक्षा अत्युग्रवातपरीक्षा वर्णिता अस्ति। वायुपरीक्षायां अद्यतनीयस्य विषयस्य निमित्ताध्यायस्य समावेशः वर्तते। अस्मिन् निमित्ताध्याये वायोः विभिन्ना स्थितिः निरूपिता अस्ति। सर्वे वक्तारः परिश्रमेण स्वविषयं समुद्घाटितवन्तः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखाविभागस्य सहायकः आचार्यः डॉ. सुधाकरकुमारपाण्डेयमहोदयः, सस्वरं वैदिकमङ्गलाचरणं कृतवान्। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान्। अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

## केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)
56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058
दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966
अन्तर्जालपुटम् - www.sanskrit.nic.in

A++ NAAC

अधिसूचनायाःसंख्या - के.सं.वि./36014/विज्ञापनम्/एस्-I/2025-26/01 दिनाङ्कः 25.03.2025

**संस्कृतसंवर्धनयोजनानां च माध्यमेन वित्तीयसहायताप्रदानार्थं वित्तवर्षे 2025-26 कृते अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्**

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानाः भारतसर्वकारस्य शिक्षामन्त्रालयस्य अधोलिखिताः केन्द्रीययोजनाः उपलक्ष्य 2025-26 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं नियमानुसारं सर्वकारेतरसंस्थाभिः/ स्वैच्छिकसङ्घटनैः/ संस्थाभिः/ विश्वविद्यालयैः/ प्रकाशकैः/ वैयक्तिकरूपेण/ छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1. | **संस्कृतशिक्षणम्** - पारम्परिकसंस्कृतपाठशालासु/ महाविद्यालयेषु/ सर्वकारीविद्यालयेषु/ चतुष्पाठिसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च । | 01.04.2025 | 30.06.2025* (आवेदनार्थं संपूर्णवर्षम् जालपुटम् उद्घाटितं भविष्यति) |
| 2. | **सम्मानराशिः** - अभावग्रस्तपरिस्थितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः । | | |
| 3. | **संस्कृतसंवर्धनाय कार्यक्रमाः गतिविधयश्च** - विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता । | | |
| 4. | **संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | | |
| 5. | **शास्त्रचूडामणिः** - संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः । | | |
| 6. | **व्यावसायिकप्रशिक्षणम्** - पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम् । | | |
| 7. | अष्टादशी – संस्कृतसंवर्धनाय अष्टादशी परियोजना(निर्दिष्टक्षेत्रेषु आवेदनानि आमन्त्र्यन्ते) | | |
| 8. | **छात्रवृत्तिः** - पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/ पालिं/ प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः । | | |

***उपर्युक्तानां सर्वासां योजनानां कृते ऑनलाइन-पोर्टल् सम्पूर्णे वित्तीयवर्षे उद्घाटितं भविष्यति। किन्तु उपरि निर्दिष्टं 30.06.2025 दिनाङ्कं यावत् प्राप्तानि आवेदनानि वित्तीयसहायतार्थं सपदि आयोज्यमाने अनुदानसमितेः उपवेशने विचारार्थम् उपस्थापयिष्यन्ते। उपर्युक्तदिनाङ्कतः परं प्राप्तानि आवेदनपत्राणि अनुदानसमितेः (अध्यक्षः सदस्याः च) यथानुकूलं, वित्तीयोपलब्धताम् च अनुसृत्य अनुदानसमितेः अग्रिमे उपवेशने विचारार्थं प्रस्तोष्यन्ते। तथा एतदपि ज्ञातव्यं यत् निर्दिष्टे वित्तीयवर्षे एव उपलब्धधनराश्यनुगुणं वित्तीयसहायतार्थम् आवेदनानां विचारः करिष्यते।**

### अवधातव्याः निर्देशाः

I. उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते । अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते ।
II. योजनायाः दिशानिर्देशानुसारं प्रकाशनसामग्र्यः/ पुस्तकानि/ अनिवार्यपत्राणि सक्षमाधिकारिणा प्रमाणितस्य अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथग्रूपेण प्रेषणीयानि । आवेदनपत्रस्य अनुलग्नकानां च सर्वपृष्ठेषु आवेदकेन हस्ताक्षरम् अवश्यं विधेयम् । सर्वेषां पत्राणां स्वसत्यापनम् अपरिहार्यम् ।
III. पूर्णरूपेण प्रपूरितस्य आवेदनपत्रस्य छायाप्रतिः पञ्जीकरणस्य अन्तिमतिथेः 20 दिवसाभ्यन्तरे "निदेशकः (केन्द्रीययोजनाः), (....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058" इति अनिवार्यतया प्राप्ता भवेत् ।
IV. आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः ।
V. प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटम् www.sanskrit.nic.in/schemes अवलोकयन्तु ।
VI. उपर्युक्तायाः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहाय्यतां प्राप्तुं प्रतिवर्षं पृथग् रूपेण आवेदनं कर्तव्यम् । योजनायाः नियमानुसारं विगतवर्षेषु प्राप्तानाम् आवेदनानां स्वतः नवीनीकरणं न सम्भवति ।
VII. आवेदनानां स्वीकृतिः अथवा तिरस्कृतिः धनस्य उपलब्धताम् आधारीकरोति । अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहाय्यतायाः निमित्तं पृथक्तया आवेदनं समर्पणीयं भवति ।
VIII. कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा संशयनिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल help.schemes@csu.co.in माध्यमेनवा सम्पर्कयितुं शक्नुवन्ति ।

हस्ता/-
कुलसचिवः प्र.

---

प्रथमपुटस्य शेषभागः

## 'यावत् संस्कृतं समृद्धं भविष्यति,....

वर्षे आरभ्य एषं कार्यं कुर्वती अस्ति। वर्तमानसत्तासंस्था अपि अस्य संवर्धनाय तत्परा अस्ति। केन्द्रसर्वकारः केन्द्रीयसंस्कृतविश्वविद्यालयं



माध्यमेन आर्थिकसहाय्यं दत्तवती। संस्कृतविद्वानां मानदण्डवेतनं च वर्धितम्। सहस्रचूडामणियोजनाया अन्तर्गतं सेवानिवृत्तविद्वानः संस्कृतशिक्षायाम् नियुक्ताः सन्ति। असौ अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी 'ज्ञानभारतं' नामकं नवं अभियानं आरब्धवान, यस्य अन्तर्गतं ५०० कोटीनां धनराशिः पाण्डुलिपीनां संरक्षणाय निर्दिष्टा। ५२ लक्षाणि पाण्डुलिपयः सूचीबद्धाः, ३.५ लक्षं डिजिटलीकृताः, namami.gov.in इत्यत्र उपलभ्यन्ते।विशेषसम्मानने उत्तरप्रदेशसंस्कृतसंस्थानम्। एतस्मिन् ऐतिहासिके समारम्भे उत्तरप्रदेशसंस्कृतसंस्थानं संस्कृतभाषायाः प्रचारप्रसाराय अस्यां उत्कृष्टे भूमौ विशेषतया सम्मानितम्। संस्थानस्य समन्वयिका राधाशर्मा तेन सम्मानचिह्नं स्वीकृतवती। कार्यक्रमस्य अध्यक्षः आसीत्-डॉ. वागीश बी. जी. (संस्कृतभारती, दिल्ली)। स्वागतसमितेः अध्यक्षः -श्री कुलभूषण आहूजा (महामन्त्री, झंडेवालामन्दिरम्)। मुख्यक्रियासु-संस्कृतगीतानि, नृत्यप्रस्तुतयः, सांसदानां संस्कृतशपथग्रहणम्, प्रदर्शनीयाः-विज्ञानम्, अर्थशास्त्रः, नाट्यशास्त्रम्, वस्तूनां प्रदर्शना च समाविष्टाः। सहयोगसंस्थाः-दिल्लीसंस्कृतअकादमी, केन्द्रीयसंस्कृतविश्वविद्यालयम्, श्रीलालबहादुरशास्त्री- संस्कृतविश्वविद्यालयः, भारतीयभाषासमिति, उत्तरप्रदेशसंस्कृतसंस्थानम्, शिक्षाविभागः च। देशस्य सर्वतः आगतानां संस्कृतप्रेमिणां, शिक्षकेषु, छात्रेषु, विद्वत्सु च विशेषः सहभागः दृष्टः। समारम्भस्य वातावरणम् संस्कृतमयम्, प्रेरणादायकं, हर्षोल्लासपूर्णं च आसीत्।

# सम्पादकीयम्

सम्मानिताः सुजनाः! सादरं नमोनमः।

पहलगामस्य आतङ्कवादीआक्रमणस्य अनन्तरम् भारतप्रधानमन्त्री नरेन्द्रमोदी आक्रोशेन सह सऊदीअरबदेशात् स्वपरिभ्रमणं त्यक्त्वा स्वदेशं प्रत्यागच्छन्। विमानपत्तने आपत्कालीनमेलनं कृत्वा तेन स्पष्टो निर्देशो दत्तः - 'अस्य आक्रमणस्य प्रत्युत्तररूपेण प्रतिशोधः प्रतिक्रिया च अवश्यं कर्तव्या।

२२ अप्रील् दिनाङ्के जातस्य आक्रमणस्य पश्चात् त्रिदिनेषु एव 'ऑपरेशन् सिंदूर' इत्यस्य योजनम् आरभ्य सेना तेन कर्तव्यानि निश्चितवती प्रायः दशदिनानां सज्जानन्तरम् अस्य सञ्चालनाय सेनायाः नियुक्तिः अभवत्। इत्यस्मिन् समये गुप्तचरीयविवरणस्य संग्रहणं मुख्यं परिस्थितिभूतं जातम्।

वैश्विकस्तरे भारतस्य कूटनीतौ एतेन समयेन प्रधानमन्त्री मोदी वैश्विकस्तरे आतङ्कवादविरोधकसहमत्याः सृजनाय प्रयत्नं कृतवन्तः। यद्यपि भारताय पूर्वमेव ज्ञातं यत् अन्ताराष्ट्रियस्तरे स्थितिः न सुलभा भविष्यति, तथापि ते प्रयासं कृतवन्तः। अन्ताराष्ट्रियसमुदायः मध्यस्थत्वाय प्रयासं कर्तुम् आरब्धवान्। एतस्मिन्नेव समये पाकिस्तानं स्वविनयप्रदर्शनरूपेण आक्रमणविषये सहकार्यं कुर्वन् इत्यात्मनाट्यम् अकुर्वत। भारताय ज्ञातं यत् पाकिस्तानेन आत्मपीडितकार्ड(victim card) इत्यस्य प्रयोगः क्रियते। अतः भारतस्य दृष्टिः आसीत्- 'प्रथमं ऑपरेशन् सिंदूर् कार्यं पूर्णं भवतु।'

७ मे दिनाङ्के ऑपरेशन् सिंदूर् सम्पादितम्। ततः परम् प्रधानमन्त्री मोदी विदेशमन्त्रिणं डॉ. एस् जयशंकरं स्पष्टीकृत्य उक्तवान् यत्-'अन्यदेशैः सम्पर्कः साध्यताम्, किन्तु स्थितेः विषये कोऽपि प्रतिज्ञा न क्रियताम्। भारतस्य रणनीतिः आसीत्-प्रथमं पाकिस्तानस्य प्रवृत्तिं पश्याम।

भारतस्य प्रारम्भिकः अभिप्रायः आसीत् यत् ऑपरेशनस्य पश्चात् अधिकं न कुर्याम। परन्तु पाकिस्तानस्य पुनः अविवेकी प्रहेलिकाभिः भारतं व्यथितम्। अतः अन्तिमक्षणे भारतं स्वनीतिं परिवर्तयामास। इदानीं भारतस्य निश्चयः जातः-"विपुलप्रमाणेन प्रत्याघातः करणीयः।

अमेरिक-सऊदीदेशयोः मध्यस्थतायाम् अमेरिकदेशः सऊदीअरबदेशश्च भारतं मन्दीकरणाय प्रवृत्तवन्तौ। किन्तु भारतं स्पष्टीकृतवत् यत्-"अन्तिमघातस्य अनन्तरं एव वार्ता सम्भवः।" गुरुवासरे रात्रौ भारतं पाकिस्तानस्य विविधेषु केंद्रेषु आक्रोशात्मकसन्देशं प्रेषितवद्। शुक्रवासरे प्रातः सहमतिरिव जाताऽभूत्। किन्तु रात्रौ पुनः पाकिस्तानस्य आक्रमणात् भारतस्य धैर्यं समाप्तम्। भारतं पुनः विशालप्रतिक्रियायाः सज्जां कृतवद्।

अमेरिकदेशस्य पाकिस्तानसेनाध्यक्षेन सह संवादः विहितः। पाकिस्तानदेशस्य सूत्रैः अमेरिकदेशेन ज्ञातं यत्र तत्र सेनायाः सर्वकारस्य च मतभेदः अस्ति। अतः अमेरिकदेशेन नवाचारं उल्लङ्घ्य पाकिस्तानस्य सेनाध्यक्षं मुनीरं फोनद्वारा सम्प्रेषितवद्। तस्मै कठोरं रोषं व्यक्तवन्तः। परिस्थितिरपि दत्ता-'यदि पाकिस्तानसेना आतङ्ककृत्यानि न निवारयति, तर्हि भारतस्य प्रहारात् त्रातुं न शक्यते।'

समग्रे विश्वसमुदायेन पाकिस्तानं प्रति एषः सन्देशः प्रेषितः। ततः पश्चात् पाकिस्तानं वार्तायाः संकेतं दत्तवद्, स्वव्यवहारे परिवर्तनं च दर्शितवद्। अन्ततः भारतं अपि वार्तासन्धिं स्वीकृत्य, एकं लगभग निश्चितयुद्धं निरस्तुम् अशक्नोत्। एषः सम्पूर्णः घटनाक्रमः भारतस्य दृढराजनैतिकदृष्टेः, सुरक्षायाः सज्जतायाः च तथा वैश्विककूटनीतेः स्पष्टं दर्शनं करोति। ऑपरेशन् सिंदूर 'भारतस्य संयोजितसैन्य-राजनीतिकविचक्षणतायाः उदाहरणं जातम्।

भवदीया-**सम्पादिका**

॥ वेद वाणी ॥

'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥
उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥
यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥'

'Just as we winnow barley with a sieve, a wise man speaks pure wisdom with his intellect. The intelligent and affectionate people grasp the friendliness in the same. They know it ensures their wellbeing.""Such a person rooted in friendliness of speech man is honoured as one of stable wisdom and intelligence among the group of the knowledgeable. The one who mechanically studies the texts without understanding their meaning and context, wanders about like barren cow. His speech is unfruitful and devoid of substance.""The speech of a person who abandons the friendship of the wise, beneficient and scholarly "man, is fruitless. Whatever he hears, he hears it wrongly and it would be devoid of meaning. He will never know the path of righteousness,meritorious deeds and well-being."'

The Rig Veda 10.71.2/5/6

**संकलन : एस.वासुदेव रावः**

# अद्यतनीये युगे बौद्धधर्मस्य सन्देशाः



-डॉ.राजकुमार शांडिल्य
हिन्दी प्रवक्ता शिक्षा विभाग चंडीगढ़

नक्षत्रा हि उदीयन्ते धरायामुज्ज्वलाः सदा।
येषां प्रकाशपुञ्जेन चालोकिता वसुन्धरा॥

भगवतो बुद्धस्य जन्म ५६३ ईसापूर्वं नेपाल देशस्य लुम्बिनी स्थाने वैशाख पूर्णिमायां नृप-शुद्धोधनस्य गृहे अभवत् । बाल्ये सः सिद्धार्थ नाम्ना प्रसिद्धः आसीत् । सः बौद्धधर्मस्य संस्थापकः दार्शनिकः धर्मगुरुः आसीत् । सः सृष्टेः पालकस्य भगवतः विष्णोः नवमः अवतारः आसीत् । सः महर्षेः विश्वमित्रस्य सन्निधौ वेदोपनिषदां शिक्षामाप्नोत्।

मल्लयुद्धे धनुर्विद्या-तथाश्वारोहणे हि सः।
ह्याप्नोत् पराक्रमः शौर्यं सर्वविद्यासु कौशलम्।
व्यतीतो बाल्यमैश्वर्ये कैशोर्ये गौतमस्य च।
गम्भीरः खलु धीरश्च बाल्येऽपि न हि चञ्चलः॥

नृपः सिद्धार्थस्य मनसि वैराग्यभावं विज्ञाय अचिन्तयत् यत् विवाहबन्धनेन सः सांसारिक कार्येषु व्यापृतः भविष्यति । सिद्धार्थस्य विवाहः यशोधराख्यया कन्यया सह जातः, तयोः पुत्रः राहुलः आसीत् ।

मनुष्याणां जीवने दुःखानि मृत्युश्च निश्चितमस्तीति तथ्यं ज्ञात्वा सिद्धार्थः दुःखानां कारणं निवारणञ्च ज्ञातुं गृहस्थजीवनं परित्यज्य भ्रमणशील तपस्विनः जीवनम् आरब्धवान्। तपसा बलेन पञ्चत्रिंशत्तमे वर्षे सः बोधगयायां बोधिवृक्षस्याधः बुद्धत्वमाप्नोत्। ततश्च बौद्धधर्मस्य विकासः जातः।

बुद्धोऽसत्यस्य नूनं वै अज्ञानाधर्मयोस्तथा।
सन्देशश्च जनेभ्यो नु अशान्तेर्नाशयन् तमः॥

बौद्धधर्मानुसार वयं सर्वे घृणाभावस्य लोभस्य, अज्ञानस्य च भ्रान्तेः आवरणे जीवामः । बुद्धः मानवमात्रं स्व ज्ञानेन, अनुभवेन च स्वयं प्रकाशं प्राप्तुं प्रेरयति । दुःखानि इच्छाभिः आयान्ति, तृष्णाभिः दूरस्थाः एव निर्वाणं प्राप्तुं समर्थाः। निर्वाण प्राप्तये ध्यानं, ज्ञानं, नैतिक मूल्यानां चावश्यकता भवति। आत्मज्ञानाय ध्यानं, साधना च आवश्यकी । तयोः विना आत्मज्ञान-प्राप्तिः न सम्भवा। सत्य-अहिंसा-अस्तेय इन्द्रियनिग्रहादि मार्गेषु तेषां विशेषाग्रहः। शान्तेः सन्देशाः मानवतायै महत्त्वपूर्णाः। जनाः आत्मश्लाघां न कुर्युः अन्यैश्चीर्ष्याभावं त्यजेयुः।

अस्माकं देशस्य ऋषिभिः तपश्चर्यया सत्य-अहिंसा-अस्तेय सदाचार प्रभृति जीवनमूल्यानां मानवीय उच्चादर्शानाञ्च स्थापना कृता। सत्यात् परः तपः नास्ति सः कदापि गोपयितुं न शक्यते।

मनसा वाचा कर्मणा चान्येभ्यः पीडा हिंसा कथ्यते। हिंसा त्यागेन परस्परमैक्यं सद्भाव वृद्धिश्च भवति। धनसंग्रहस्य लोभः, सत्तालोभः, इन्द्रियलोलुपता च समस्तपापानां मूलमस्ति। लोभत्यागेनैव मानवः अस्तेयस्य मार्गं वृणोति । संयमं विना मानवः व्यभिचारपथि चलति चरित्रस्य पतनेन च नश्यति ।

अद्यतनीये युगे भौतिकतायां निमग्नः मानवः नैतिकतां त्यजति। असत्यभाषणेन निन्दनीय कर्मभिश्च धनार्जने प्रवृत्तोऽस्ति ।

जिह्वावशगः सः जीवानां मांसभक्षणेन, अखाद्य पदार्थानां सेवनेन मदिरापानेन च प्रसीदति। लोभवशगः चौर्यकर्मसु निमग्नः पुण्य-पाप कर्मसु विवेकशून्यश्चास्ति । विषयाणां भोगेषु, तृष्णायां लोभे च संयमस्य त्यागेन च दुराचारी मनुष्यः विविध व्याधिभिः शीघ्रमेव मृत्योः मुखं प्रति गच्छति ।

अधुना आत्मज्ञानाय ध्यानेन साधना मार्गेण च आत्मोन्नतेः पथि अग्रेगमनं, स्वयमेव स्वजीवने प्रकाशः, तृष्णा-परित्यागः, विश्वे युद्धस्य विभीषिकया मानवता रक्षणं, मादकपदार्थानां सेवनेन व्यसनशीलं युवावर्गं देशञ्च त्रातुं भगवतो बुद्धस्य शान्तेः सन्देशाः, जीवनदर्शनश्च सर्वाधिकं प्रासंगिकं बहुमूल्यं चास्ति ।

# काशीतत्वप्रकाशग्रन्थस्य परिचयः

काशीनगरस्य सर्वेषां पौराणिकदेवमूर्तीनां पौराणिकतीर्थाणां च विषये सूचना अस्मिन् ग्रन्थे दत्ता अस्ति । तेषां सर्वेषां वर्तमानसङ्केतसहितं पौराणिकं सचित्रं महत्त्वमत्र निरूपितमस्ति। काशीं अवगन्तुमयं ग्रन्थः कोश इव अस्ति। द्वादशाध्यायात्मकस्यास्य ग्रन्थस्य प्रथमे अध्याये काश्याः पौराणिकमाहात्म्यस्य प्रामाणिकं प्रतिपादनं भवति, तस्याः विविधानि नामानि, आकारः, विस्तारः इत्यादीनां विषयाणां निरूपणं वर्तते। अन्येषु एकादशाध्यायेषु काश्याः ओंकारान्तर्गृहयात्रा, विश्वेश्वरान्तर्गृहयात्रा, केदारान्तर्गृहयात्रा च इति यात्रात्रयस्य चित्रात्मकं वर्णनं दृश्यते। तद्नु पञ्चक्रोशीयात्रा, विनायकयात्रा, विष्णुयात्रा, देवीयात्रा, स्वयंभूलिंगानि, द्वादश ज्योतिर्लिंगानि, सूर्ययात्रा, हनुमत्यात्रा, स्कन्दयात्रा, उत्तरमानसयात्रा, दक्षिणमानसयात्रा, दशमहाविद्यायात्रा, सप्तर्षियात्रा, सप्तपुरीयात्रा, तत्वयात्रा, अविमुक्तयात्रा इत्यादीनां वर्णनं विद्यते। काशी-नगरस्य सर्वेषां पौराणिकस्थानानां भौगोलिक-सर्वेक्षणं स्वयमेव कृत्वा लेखकेन एतत् पुस्तकं लिखितम् अस्ति । केचन देवविग्रहाः अदृश्याः अथवा अज्ञाताः सन्ति, जर्जरस्थितौ वा सन्ति, तेषां सर्वेषाम् अनुसन्धानं कृतम् अस्ति, तेषां प्रामाणिकसूचना च अस्मिन् पुस्तके दत्ता अस्ति। काशी-नगरस्य प्राचीन-पर्वत-नदी-गुहा-वृक्ष-तपःस्थल-स्तम्भादीनां चित्रात्मकं वर्णनमपि तस्मिन् कृतम् अस्ति । काशीनगरस्य सर्वासां पौराणिकमूर्तीनां तीर्थाणां च अकारादिक्रमसूची, प्राप्तमूर्तीनां क्षेत्रतः सूची, अप्राप्तमूर्तीनां क्षेत्रतः सूची इत्यादिना अस्य ग्रन्थस्य उपयोगिता अधिका वर्धिता अस्ति।




पुस्तकप्राप्तिस्थानम्-
वैदिकविज्ञानकेंद्रम्, श्रीविश्वनाथमन्दिरनिकटम्,
काशीहिन्दूविश्वविद्यालयः

# समायोजितः मईमासीयचक्रस्य अभिमुखीकरणकार्यक्रमः

लखनऊ। अद्यतन: एषः अवसरः अस्माकं कृते परमगौरवपूर्णः विषयः सञ्जातः यत् संस्कृतभारत्याः दिल्लीशाखया आयोजितानां १००८ सामूहिकसंस्कृतसंभाषणशिविराणाम् सफलसमापनं न केवलं कस्यचित् आयोजनस्य समाप्तिः अपितु भाषाजागरस्यैव कश्चन महोत्सवः । अस्मिन् ऐतिहासिकसंधौ उत्तरप्रदेश-संस्कृतसंस्थानम् विशेषतः सहभागीभूय गौरवम् अन्वभवत् । यस्य कृते वयं अत्यन्तं हृष्टाः कृतज्ञाः च स्मः। किन्तु अद्य विशेषरूपेण अहं तस्मै वर्गाय हृदयतः अभिनन्दनं दातुमिच्छामि, यः अस्य अभियानस्य आत्मा अस्ति-यूयं सर्वे प्रशिक्षकगणाः। यूयं एव ते ये निःस्वार्थभावेन, अहर्निशं परिश्रम्य, संस्कृतभाषायाः प्रचारप्रसाराय स्वं तनु-मनः समर्पितवन्तः। यूयं दिल्लीराज्यस्य ग्रामे ग्रामे, नगरे नगरे, गल्यां गल्यां, विद्यालये विद्यालये, महाविद्यालये महाविद्यालये च गत्वा संस्कृतसंभाषणस्य शिक्षणं विहितवन्तः। संस्कृतजनांदोलनस्य आधारस्तम्भाः यूयं प्रशिक्षकगण एव।अतः अस्य समापनसमारम्भस्य सफलसंपन्नतायाम्, अहं समस्तान् प्रशिक्षकान् कोटिशः धन्यवादं, साधुवादं, हार्दिकं च अभिनन्दनं समर्पयामि। संस्थानाय यः सम्माननं प्रदत्तं तत्तु युष्माकं समर्पणस्यैव प्रतीकः। संस्थानस्य पदाधिकारिणः, ममौ द्वौ समन्वयकसख्यौ, प्रशिक्षकवृन्दश्च-यूयं सर्वे अस्य सफलतायाः वास्तविकसहभागिनः। युष्माकं कार्येण केवलं भाषा जीवति, अपि तु संस्कृतेः पुनरुत्थानं अपि स्फुटं दृश्यते। इत्येतत् उदीरितं सत्रसमायोजकेन प्रशिक्षण समन्वयकेन आचार्येण धीरजमैठाणिना।

तेनोक्तं यत् अयं संस्कृतसंभाषणाभियानरूपः महायज्ञः, तत्र युष्माभिः समर्पिता आहुतिः संस्थानपरिवारस्य अन्यसदस्येभ्यः अपि नित्यं प्रेरणां दास्यति। अस्मिन् उपक्रमे प्राप्तं ज्ञानं जीवनपाथेयरूपेण स्थापयन्तु। ये संस्मरणानि मनसः क्लेशं जनयन्ति, तेषां पूर्णतया परित्यागः करणीयः।

अवधेयं यत् दिल्ल्यां १००८ संस्कृतसंभाषणशिविराभियाने भागं ग्रहीतवतां प्रशिक्षकाणाम् अभिनन्दनाय समायोजितस्य

शेषभागःअष्टमपुटे

# संस्कृतपत्रकारितामाध्यमेषु भाषाप्रयोगस्य विमर्शः



-डॉ. युवराजः भट्टराई
समवाप्तसाहित्याकादेमीयुवपुरस्कारः
संस्कृतशिक्षकः, कविः, लेखकः, पत्रकारश्च

विदितमेव समेषाम् यत् पत्रकारितायाःबृहत्तमंकार्यद्वयं वर्तते- प्रथमं तावत् पाठकानाम् अभिज्ञानंद्वितीयं च प्रकाशितानां वार्तानां सर्वाधिकतया विश्वसनीयताप्रतिपादनम्। पाठकाः श्वः किं पठितुं वीक्षितुं वासमीहन्ते?कस्मिन् सामाजिकेसांस्कृतिके वा विषये दर्शाकानां पाठाकानां वाकृते चर्चासमुपयुक्ताभविष्यति, इत्यादिप्रसंगानां दूरदर्शितायां सत्यामेवकश्चिदपि पत्रकारः वार्ताहरः अथवा तदीयंवार्तापत्रं वार्ताप्रसारणं वासफलंभवितुंसमर्हति। प्रामाणिकतया, सन्तुलनेन, स्पष्टतया, मानवीयाभिरुच्याउत्तरदायित्त्वबोधपूर्वकंच प्रस्तुताः वार्ताः पाठकानां मनोमस्तिष्केषु गम्भीरं प्रभावंजनयन्ति। आधुनिक-पत्रकारितायाः जनकस्य पुलित्जरस्यकथनमपि समुचिततरं विभातियत् - समुच्चाचार-सिद्धान्तं विश्वसनीयतांचविना वार्तापत्राणि, तेषां पत्रकाराश्चसर्वकारीयाधिकारिणामिव न केवलं विफलाः भविष्यन्ति, प्रत्युत समाजायापिहानिकराः संकटकराश्चसेत्स्यन्ति।

संस्कृत-पत्रकारितायाः कृते महनीया आवश्यकता वर्ततेअस्याः विश्वसनीयतायाः सर्वोत्कृष्ट-स्तरं यावत् प्रापणम्। वार्तानां गवेषणा उत्तमावर्तते, किन्तुवार्तानांकृते शब्दैः साकंअनुपयुक्तरीत्या खेलनंनितान्तमेवअनुचितं वर्तते। निरंकुशाः लेखकास्तु शब्दैः समं क्रीडन्ति, परंपत्रकारैः सांकुशाः शब्दाःभवन्तिप्रयोक्तव्याः। समाजेदुष्प्रभावं जनयितुं शब्दैः साकं खेलनं तथ्यानांत्रोटनं मोटनं चवार्तापत्राणामेवनैव, पत्रकाराणांवार्ताहराणांकृतेचापि संकटस्यघंटिकावादनमिववर्तते। विविधेषु वार्तापत्रेषुएवमेवदरीदृश्यते यत् नेतृणां वक्तव्यानाम् आधारे संवाददातारःस्वस्यपक्षातःकिंचिदपिवंचनाप्रकरणं संवेदनशीलवार्त्तारूपेणप्रस्तुवन्ति। कस्यचिदपि नेतुः वक्तव्यमात्रंतस्यभाण्डभंजनस्य आधारः नैवभवितुंशक्नोति। भूरि वारं तुतत् केवलंआरोप एवभवतियद्धि नेता स्वीय-स्वार्थ-साधनार्थमेवआरोपयन्ति। अतः एतादृशीनां वार्त्तानां निर्माण-समये सावधानैः भाव्यंवार्ताकारैः।

शोभनंगवेषणायुतंवार्त्ताविवरणविधानपराणांनैकेषां संवाददातृणां वार्त्ताहराणां चतर्कः भवतियत्तेषांपार्श्वेप्रपत्राणि सन्ति, अतएवसम्बद्ध-जनस्य पक्ष-पृच्छायाः काभवेदावाश्यकता। संवाददातृभिः वार्ताहरैश्चएतद् विज्ञेयं यत् प्रपत्राणि प्राप्तानि सन्तिइत्यस्यार्थःएवंनास्तियत्वार्ताहराःनिर्णयार्थं स्वतन्त्राः सन्ति। भूरिवारं तुएतदुल्लेखः मिलतियत्वार्ताहरेण आरोपितेनजनेन,सम्बद्धाधि-कारिणाचसाकंदूरभाषेण सम्पर्कस्यप्रयत्नः कृतः, किन्तुसम्पर्कः नैवसाधितः। एतद्धिआत्म-रक्षायाः निकृष्टा रीतिः वर्तते।

एतेन संवाददाता वार्ताहारोवावार्तापत्रस्यउत्तरदायित्वात् मुक्तिः नैवप्राप्नोति। न्यायालयस्य न्यायाधीशानांसमक्षमपिप्रपत्राणि साक्ष्याणि चभवन्ति, किन्तुतेपितदुपरि कस्यापिनिर्णयस्यप्रदानात् प्राक् सर्वेषाम् पक्षाणां तर्कान् शृण्वन्ति। सर्वविदितःकुख्यातः हत्यापराधी अपिस्वस्यपक्षस्यस्पष्टतया उपस्थापनार्थं परिपृच्छ्यते। निश्चप्रचं पत्रकारोपि न्यायस्यउत्तरदायितातः आत्मानं पृथक्कर्तुंनैवपारयति। वार्ताहरेण केवलं तथ्यानांप्रसारणंप्रकाशनंवाविधीयते, उचितानुचितायोः निर्णयंस्वयं पाठकाः करिष्यन्ति। दक्षता-कुशलता-युतैःवार्ताहरैःसमेषां पूर्वाग्रहाणां आस्थानांचविषयेभ्यःस्वीयाः वार्ताः रक्षणीयाः भवन्ति येखलुअद्यत्वेअस्माकंपत्रकारितायाः सम्मुखंसंकटस्यबृहत्पाषाणखण्डत्वेन स्थिताः सन्ति।

प्रामाणिकता एतदर्थम् अप्यावश्यकमस्ति यद् एक-पक्षस्य स्थापनानन्तरं द्वितीयः पक्षः एतन्मत्वा चलति यदेषा वार्त्ता तदीय-राजनीतिक-शत्रुभिः प्रकाशितम् अस्ति उत वा वार्त्ताप्रबन्धनेन लिखितम् इति। वस्तुस्थितिरियमस्ति यत् कश्चिदपि विद्वान् मनीषी पत्रकारः एतादृशीं प्रायोजितां वार्त्तां नैव लिखति। परन्तु यदा स्पष्टीकरणस्य प्रकाशनस्य प्रसङ्गः समायाति तदा नैके पत्रकाराः कष्टम् अनुभवन्ति।

आपराधिक-वार्तानां चयनम् अतिसावधानतया कर्तव्यम्। अपराध-वार्त्तालेखके अपराध-वार्त्ता-सम्पादके च सामान्य-विधिनियमानां प्रक्रिया-ज्ञानं भवतु। अपराधानां वार्त्ताः सर्वाधिकत्वेन पठ्यन्ते अत एव तासु वर्त्तासु संयमता विश्वसनीयता चाधिक्येन आवश्यकी भवति। अस्मिन् प्रसङ्गे वर्ताकारैः सविशेषं ध्येयम् अस्ति यत् केवलम् अपालापानाम् आधारे किमपि लेखितुं न शक्यते। कुतश्चित् श्रुतमित्याधारे वार्त्ताः नैव प्रकाशयितुं शक्यन्ते।

न्यायालयस्य न्यायाधीशस्य मानहानिपराः वार्त्ताः वर्तमान-नियमान् ध्यात्वा नैव लेखितव्याः नैव च प्रकाशयितव्याः। यदि आरोपः कस्यचिद् वक्तव्यस्य आधारे आधारितौस्ति तदानीमपि न्यायालयस्य उत्तरदायित्वं अन्ततोगत्वा संपादकस्य प्रकाशकस्य एव भविष्यति। जनहितस्य ध्यानपूर्वकमेव वार्त्ताः प्रकाश्येरन्। प्रतिशोधस्य भावनाभिः लोभेन, मोहेन च प्रेरिताः वार्त्ताः नूनमेव नियन्त्रणीयाः। वार्त्तासु विचाराणां मिश्रणं न भवतु विचारखण्डेषु सूचनाश्चापि अनुपात-तः आवश्यकतातौधिकः नैव भवतु।अथ च वार्त्तापत्राणाम् उत्तमवार्त्तासु अपि उत्तमभाषायाः प्रयोगः नितान्तमावश्यकमस्ति। श्रेष्ठभाषायाः अर्थः एतन्नास्ति यत् वार्त्ताहरः उत मुख्य-सम्पादकः उपसम्पादकः संस्कृतभाषायाः वैयाकरणो महापण्डितो वा भवतु । प्रत्युत स शुद्ध-सरलभाषायाः उपयोगे कुशलः भवतु। तस्य शब्दानाम् आकरः केवलं स्रोतांसि, ज्ञातव्यानि च, उल्लेखनीयानि सन्ति। अमुना प्रोक्तं, अनेन प्रतिपादितम् इति यावत् नैव भवतु, न च भाषया सन्धिसमासाधिक्यसंस्कृतनिष्ठया भाव्यम्।

अतः वार्त्ता-लेखनात् सम्पादनात् पूर्वं वार्त्ताहरैः यदि केवलम् एतद् ध्यास्यते चेत् भाषायां गुणात्मकं परिवर्तनम् आगन्तुं शक्नोति। तच्चैतदस्ति यत् वार्त्तालेखकः वार्त्तासम्पादकः च सर्वादौ एतद् चिन्तयेत् यदेषा सूचना तेन स्वीये गृहे मात्रे मातामह्यै वासूचनीया वर्त्तते तर्हि कीदृशी भाषा प्रयोक्ष्यते। भाषायां सर्वाधिकः दुष्प्रभावः सर्वकारीय-संस्थाभ्यः अन्य-संस्थाभ्यश्च प्रस्तोष्यमाणानां विज्ञप्तीनां कारणेनापि भवति। दुर्भाग्यवशाद् अस्माकं वार्त्ताहराः, संवाददातारः तादृशानेव शब्दान् यथायथं स्वीय-वार्त्तासु स्थापयन्ति। ये खलु शब्दाः सामान्यजनेभ्यः साधारण-पाठकेभ्यः च दुर्बोधाः भवन्ति, अतः वार्त्ताहरैः एतादृशाः शब्दाः वर्तासु परिहर्तव्याः, सर्वकारीय-विज्ञप्तौ दत्तं वाक्यविन्यासं यथायथं नैव लिखन्तु।

भाषायाः सरलता केवलं शब्देषु एव निर्भरा नैव भवति। वाक्यानां रचनायाः अपि समवधानमावश्यकमस्ति। यथा आङ्ग्लभाषायाः वाक्य-विन्यासः संस्कृत-भाषायाः हिन्द्याः उत अन्यभारतीयभाषाणां प्रकृतेरनुरूपं नास्ति। अनुवादस्य समये वाक्य-विन्यासे विशेषं ध्यानप्रदानम् अधिकमावश्यकमस्ति। अनुवादस्य कतिपयोदाहरणं विलोकितुं शक्यते। यथा आङ्ग्लभाषायां कथ्यते 'judgement was reserved'. एतस्य वास्ताविकौर्थो वर्तते 'न्यायाधीशः पश्चात् निर्णयं श्रावयिष्यति।' परम् भवद्भिरेतस्यार्थः वार्तापत्रेषु पठितः स्यात् यत् 'न्याधीशेन निर्णयः सुरक्षितः' हिन्द्यां च 'फैसला सुरक्षित रखा।' यदि न्यायाधीशेन निर्णयः कृतः एव नास्ति तर्हि निर्णयः सुरक्षितः कुत्र कथं च स्थापयिष्यते। एवमेव बालानाम् अपहरणापराधानां कृते आङ्ग्लभाषायां लिख्यते 'Child lifting' केचन हिन्दीपत्रकाराः अस्यार्थं 'बच्चा उठाना' एवं रूपेण अपि कुर्वन्ति। परम् उचितं तु एवमेव अस्ति यत्ते वर्त्ताहराः अपहरणमिति शब्दस्य उपयोगं कुर्युः। इत्थमेव यदा आङ्ग्लभाषायाम् अभिधीयते 'with immediate effect' अत्रापि 'तत्काल-प्रभावात्' उत 'तत्काल प्रभाव से' इति लेखनस्य अपेक्षायां एतत् कथनमधिकमुपयुक्तं भवति यत् 'आदेशः क्रियान्वितः' 'आदेश लागू हो गया है।' एवमेव अन्यत्रापि भूरि स्थानेषु अनावश्यक-रूपेण वाक्यप्रयोगाः वार्त्ताहरैः विधीयन्ते । तद्यथा 'जलौघस्थितौ परिष्कारो जायते।' अस्य स्थानेजालौघकारणेन सञ्जातस्थितौ परिष्कारो जायते।' इति लेखनम् उचितं भवति। अथ चकथित-शब्दस्यापि भृशं दुरुपयोगो भवति। 'कथित वधिकः" "कथित हत्याकर्त्ता" इति कथनम् उचितम् अस्ति, किन्तु 'कथित-आरोपी' इति प्रयोगस्य सामञ्जस्यं नास्ति। यतो हि आरोपे हीदं निहितमस्ति यत् जनस्य दोषः सिद्धः नास्ति। तस्मिन् केवलं लाञ्छनमेव आरोपितम् अस्ति । व्याकरणदृशा वाक्यविन्यासदृशा भाषा शुद्धा सरला च भवेत्। हिन्दीभाषायां उर्दू आङ्ग्लादिशब्दानां प्रचुरप्रयोगाः भवन्ति,परन्तु प्रत्येकमपि शब्दानां बहुवचनार्थ-प्रयोगाः नैव विधेयाः। यथा 'कागजात' 'जवाहरात' स्वयमेव बहुवचनार्थकौ स्तः। अतः कागजातों जवाहरातों इति प्रयोगस्तु अनुचित एव। परं संस्कृते प्रपत्राणि मणिमाणिक्यानि इति रूपेण प्रयोगः सुतरां कर्तुं शक्यते।

प्रायः एतादृश्यो वार्त्ताः अपि दृश्यन्ते येषु लिखितं भवति यत् - शएकतः मुख्यमन्त्री भयमुक्त-समाज-निर्माणस्य सबलं प्रतिपादनं कुर्वन् वर्तते, तत्रैव अपरतश्च चौराः अमुके ग्रामे एकस्य आपणस्य तालकं विभज्ज्य वस्तूनि चोरितवन्तः।' एतत् कस्यापि नेतुः वक्तव्यं भवितुं शक्नोति, न तु वार्त्ता। वार्त्ता तु केवलम् एतावती वर्तते यत् आपणे चौर्यं जातम्। भाषासौष्ठवार्थं पुनर्लेखनमपि आवश्यकमस्ति। पत्रकाराः वार्त्ताहराश्च एतदपि ध्यानं दध्युः यत् वार्त्तापत्राणां सञ्चार-माध्यमानां च चायमिति प्रपाणक-रस-पात्रमिव सम्भाल्य स्थापनमावश्यकमस्ति यत्र ऊष्ण-जल-निधान-समये स्वस्यात्मनि शीतलताधानं भवतु।

अथ च वार्त्तापत्राणां विभिन्न-संस्करणेषु सञ्चार-माध्यमेषु च चित्रस्य दृश्यस्य च गुणवत्ताविषये निश्चप्रचम् अधिक-ध्यान-प्रदानस्य आवश्यकता वर्तते। औपचारिक-कार्यक्रमाणां सभानां च चित्राणि दृश्यानि कदापि पाठकान् आक्रष्टुम् नार्हन्ति। प्रत्येकमपि पृष्ठेषु मुद्रितानि चित्राणि एवंप्रकारकाणि भवेयुः यानि खलु पृष्ठसज्जादृशा आकर्षकाणि तु स्युरेव, येन पाठकाः तस्मिन् चित्रान्विते पृष्ठे निरुद्धाः स्थिताश्च भवेयुः।

वैद्युतिक-सञ्चार-माध्यमानां क्रान्तेरनन्तरमपि साम्प्रतिकेषु वर्षेषु प्रिंट-मीडिया इति मुद्रित-वार्त्ता-माध्यामानां महत्त्वं वर्धतेतराम्। कतिपयवर्षपूर्वं वैश्वीकरणस्य कारणेन संस्कृत-वार्त्ता-माध्यामानां महत्त्वस्य नैयून्यम् आशङ्क्यते स्म। किन्तु हर्षावहौयं विषयो यत् सम्प्रति संस्कृतवार्त्तापत्राणां प्रसार-संख्या सत्वरं समेधते। अनेन एतत् प्रमाण्यते यत् भारते स्वस्य प्रभावं वर्धयितुकामाः जनाः बृहत्समवायाश्च आगामिकाले नूनमेव संस्कृत-वार्त्ता-सञ्चार-माध्यमानाम् आश्रयं स्वीकरिष्यन्ति। परन्तु एतादृशे काले संस्कृतवार्त्तापत्रैः, अन्यैः संस्कृत-सञ्चार-माध्यमैः वा सम्बद्धाः केचन पत्रकाराः, वार्त्ताहराः, सम्पादकाश्च हीनभावनया ग्रस्ताः तिष्ठन्ति। ते विस्मरन्ति यत् तेषां प्रतिष्ठा संस्कृत-भाषायाः व्यापक-प्रभावस्य प्रतिष्ठया साकं सम्बद्धा वर्तते। यदा प्रतिष्ठायाः भावः नहि भवति तदा भाषायाः विकासः अवरुद्धः भवति। भाषायाः अभिव्यंजना शिथिला भवति। संस्कृतस्य पाठकानाम् अभिरुचिः सीमिता नास्ति। ते निज-ग्रामस्य नगरस्य उपनगरस्य च घटनाबोधने यावदुत्सुकाः सन्ति तावदेव समस्त-विश्वस्य-वृत्तान्त-बोधनैपि समुत्कण्ठिताः भवन्ति। यथा अन्यभाषाणां वार्त्तापत्राणां पाठकानां भवति। सत्यं तथ्यं त्विदमेव वर्तते यत् संस्कृतस्य पाठकाः संस्कृतैपि अधिकांशतया तादृशीं सामग्रीमीहन्ते यथा अन्येषु वार्त्तापत्रेषु भवन्ति। परमत्रेदमवधेयं यत् संस्कृत-वार्त्ता-पत्राणां पत्रकाराणां वार्त्ता-हराणां वा पार्श्वे साधनानि सीमितानि सन्ति, तथापि सुष्ठुतया विश्लेषणं विधीयते चेत् निष्कर्षत्वेन वक्तुं शक्यते यत् संस्कृत-वार्त्ता-पत्राणि सामाजिक-समस्यानां प्रकाशने अन्य-प्रतिपाद्य-विषयाणां च प्रतिपादने सम्यङ् निरतानि सन्ति। यतस्तेपत्रकाराः न्यूनतम-वेतनेषु अपि अधिकाधिक-समर्पित-भावेन कार्यम् आचरन्ति। अत्रेदं सत्यमपि स्वीकर्तव्यम् अस्माभिः यद् आधुनिके काले संस्कृत-पत्रकारितायां तावत्यः प्रभावकर्यः पत्रिकाः प्रकाशिताः न सन्ति यावदस्याः आवश्यकता प्रतीयते। अथ च कतिपय-संस्कृत-पत्र-पत्रिकाणाम् अकालमृत्युरपि संस्कृत-पत्रकारिता-जगते दुर्भाग्यस्य विषयो वर्तते। संस्कृत-पत्रिकाभ्यः विज्ञापनं काठिन्येन प्राप्यन्ते। एतस्य कारणमेकमेतदप्यस्ति यत् विज्ञापन-जगति संस्कृतस्य जनाः नगण्याः एव प्राप्नुवन्ति। संस्कृत-पत्रकारितायाः प्रभावमेधितुं तस्याः सशक्तीकरणार्थं च विज्ञापनस्य प्रसारस्य च क्षेत्रेषु संस्कृत-सम्बद्ध-जनानां प्रोत्साहनम् आवश्यकमस्ति। संस्कृते पत्रकारितायाः स्वर्णिम-युगम् तदानीमेव आयास्यति।

एतत्तु सर्वविदितमेव यदन्यासां भाषणाम् अपेक्षया संस्कृतस्य सांस्कृतिकताः, संस्काराः, परम्पराः, बौद्धिकताश्च गहनतया भारतीय-सर्व-समाजे रोपिताः स्थापिताः वा सन्ति। अतो यदि संस्कृत-पत्रकारिता सम्यक्तया चलति चेत् सा यथा समाज-स्तरे विषयवस्तु-सन्दर्भे पाठकानां ध्यानं दास्यति, तथा तु आङ्ग्ल-पत्रकारिताः, अन्य-पत्रकारिताः वा कदापि कर्तुं नार्हन्ति। तथापि वयं पश्यामो यत् संस्कृत-भाषीय-पत्रकारितायाः समक्षं यादृश-समाह्वानानि समुदितानि सन्ति तेषां निराकारणार्थं संघटनात्मिका, सङ्घत्मिका, सामूहिकी वा सज्जता नैव दृश्यते। संस्कृतस्य कृते तु हिन्दीभाषी प्रदेशानाम् अहिन्दीभाषीराज्याणां मध्ये जायमानं युद्धमिव भाषाविरोधस्य युद्धमपि नास्ति। यतोहि अस्याः भाषायाः सामाजिकं सांस्कृतिकम् आध्यात्मिकं च महत्वं सर्व-राज्यवासिभ्यः समानरूपेण महत्त्वपूर्णं वर्तते।

वैश्वीकरणस्य अस्मिन् समये संस्कृतस्य पत्रकारेभ्यः, पत्रकारितायै च नूनमेव एकं बृहत् सङ्कटमिदमप्यस्ति यत् नैकेषु पत्रकारिता-सञ्चार-माध्यमीय-संस्थानेषु समवायेषु च प्रबन्धकाः मुख्यसम्पादकाश्च आङ्ग्लवार्त्तापत्राणि आङ्ग्ल सञ्चारमाध्यमानि वा आदर्शं मत्वा तदेव अनुकुर्वन्ति सहैव पाठकानां याच्ञायाः नाम्नि अधिकाधिकां मनोरञ्जनकरीं उत्तेजनापूर्णां वा सामग्रीं प्रकाशयितुं प्रसारयितुं वा आवश्यकं मन्यन्ते। एतत् सर्वं मया दूरदर्शने आकाशवाणीमध्ये चसंस्कृतवार्ता वाचन-सम्पादनावासरे स्वयामेवानुभूतं तथ्यमस्ति, येनाहं निःसंकोचमत्र उल्लिखामि।

एतदत्र ध्येयं यत् केवलं चलच्चित्राणां, फैशनादिनां यौन-प्रसङ्गानां वा सामग्रीभिः पाठकाः प्रसन्नाः भविष्यन्ति, इति धारणा तु केवलं मृषा धारणा एव भवितुं शक्नोति। एतादृशीनां वार्त्तानांप्रभावात् संस्कृत-सञ्चार-क्षेत्रस्य सुरक्षार्थं समुचित-दृष्टियुतैः जागरूकैः पत्रकारैः महत्वपूर्ण-भूमिका निर्वोढव्या भविष्यति। अतः खलु कुत्रापि कापि लक्ष्मण-रेखाकर्षणीया।

विश्ववार्त्ताविपणस्य समक्षं समर्पणस्य चक्रे गम्भीर-वैचारिक-सामग्री विहातुं नैव उपयुज्यते। यतोहि भारते देशे संस्कृतपत्रकारिता सञ्चारमाध्यमानि च सामाजिक-जागरूकतायै संस्कृति-सभ्यतारक्षणायै च महत्वपूर्णं योगदानं कर्तुं समर्हन्ति। इदं तु नितान्तमेव सत्यं यत् स्वाधीनतायाः समरमिव पत्रकारिता सम्प्रति अभियानत्वेन नैव प्रचलति, किन्तु व्यावसायिक-पत्रकारितायामपि राष्ट्रस्य समाजस्य पाठकानां च हितानां रक्षा आवश्यकी वर्तते।

# त्वन्नाशस्तु भविष्यति



डॉ० निरञ्जनमिश्रः

हिन्दुत्वे नहि शस्त्रचालनमिदं सृष्टेर्विनाशोद्भवः
तद्रक्षार्थमिहाधुना स्वशयनाद्दीप्तोत्थिता कालिका।
रे रे राक्षस मत्त मूढ जननेनैवाधम त्व क्षणं
तिष्ठ त्वद्वदनांशलुञ्चनसुखं प्राप्स्यन्ति मद्भैरवा;।।१

वज्राणां घनवर्षणं शिरसि ते दीप्तं तडित्ताण्डवं
दीप्तास्त्रोद्भटगर्जनैः श्रवणयोर्विस्फोटनं सत्वरम्।
सिन्धोर्गर्भतलात्प्रचण्डदहनज्वाला त्वदीयांगने
स्वच्छन्दं नव नर्तनेन मनसामोदं चिरं प्राप्स्यति।।२

दन् दन् दन् दन् दनादन् चलति भुशुण्डी प्राङ्गनाच्छैलजाया
बुं बुं बुं बुं बुबुं बुं स्फुटति च कुलिशस्फोटकं शत्रुगेहे।
धां धां धां धां धधां धां स्फुरति शतघ्नी वज्रगोलां क्षिपन्ती
स्वप्ने दृष्टं मया यद् भवति कदा तद् ब्रूहि शम्भो! त्वमेव।।३

रे रे मत्तपिशाच फेरवकुलोद्भूत श्वपुच्छ स्वयं
गर्तान्निस्सर कातर त्वमधुना जानामि ते बुक्कनम्।
द्वारे ते समुपस्थितोऽस्मि सुदृढो नीत्वा पिनाकं स्वकं
यस्य स्फोटनमेव जीवनवनस्योत्पाटने तेऽस्त्यलम्।।४

त्वद्रक्तेन हि बन्धुतर्पणविधिं सम्पादयिष्याम्यहं
त्वद्वद्बध्वश्रुजलेन मूर्च्छितमुखं संक्षालयिष्याम्यहम्।।
त्वद् मांसेन बलिर्भविष्यति चिरं मद्वायसानां तथा
गेहे ते नवनर्तनेन हि सुखं प्राप्स्यन्ति भूताङ्गना।।५

धर धराधर दानवानां मस्तके चरणं निजं
कण्ठशोणितविन्दुभिर्लिख दैत्यशातनगौरवम्।
चिन्तनं त्यज सत्वरं धर दीप्तखड्गं कौलिशं
नीलगगनं दर्शय त्वं बाहुवीर्यनिदर्शनम्।।६

## भारतमातुः सिन्दूरम्



-डॉ. विपिनकुमारद्विवेदी

असितकेशमध्यविभूषित-
सिन्दूरं खलु रमणीयम्।
भारतमातुः परमपावनं
शौर्यप्रतीकं नमनीयम्।।

यदा यदा परिमार्ष्टु रिपवो
यतिशीला तज्जायन्ते ।
तदा तदा हरिभूषितजननी
निजपुत्रैस्तान् ध्वंसयते।।

हिमगिरिसमं समुन्नतभालं
जलधिसलिलमिव तद्बलराशिः।
सैनिककुलं तदीये हस्ते,
परितोटन्ति तेजोवासि।।

दारुणखड्गदीप्तिसहिते हे,
मातः सम्प्रति पश्य रिपून्।
प्रचण्डसंगरे भव काली त्वम्,
अरिकुलरक्तं पिब तदसून्।।

शेषाः स्युर्नहि केपि हि रिपवः,
समराद्यान्तु न सन्तु निलीनाः।
एकं एकं जहि जननि हे,
पुनर्भवेयुर्न युद्धरताः।।

भैरवरूपं दर्शय मातः,
तेषामुरो विदारय हे।
रक्तरंजितं सकलं देहम्,
कुरु जननि खलु शीघ्रं मे।।

हे अम्बे शपथं नय नव्यम्,
शत्रुहतेः खलु राष्ट्रहितस्य।
अभयाः सन्तु हि दोषविहीनाः,
सन्ततयस्तव पदे पदे।।

वन्दे मातरम्, वन्दे भारतम्
भारतमाता की जय!

# सिन्दूराक्रमणाष्टकम्!!!



-डॉ. अरविन्दकुमारतिवारी

रे रे नीच! कृतं त्वया पहलगामे दुष्कृतं कीदृशं
सानन्दं भ्रमतो जनान् निहतवानातङ्कवादिन् ! कथम्?
मातुस्त्वं यदि पीतवानसि पयस्तिष्ठेः क्षणं सङ्गरे
सम्पश्याक्रमणं द्रुतं बहुविधं मे भारतीयं ध्रुवम्!! १
पातुं नैव जलं गृहे तव रिपो! भोक्तुं कुटीरेऽन्नकं
रक्षार्थं न बलं परन्तु कुरुषे रे दुष्ट! दुस्साहसम्।
लब्ध्वा सत्प्रतिवेशिभारतकृपां रे रे कृतघ्नाधुना!
निर्दोषान् विनिहंसि हन्त मनुजान् लज्जस्व रे पामर!! २
दृष्ट्वा भारतवर्षहर्षममितं चेखिद्यमानो मुहु
विस्फोटं कुरुषे निहंस्यनुदिनं मद्बान्धवान् दुष्ट रे!
आतङ्कं तनुषे वृथा कथमये काश्मीरभूमौ रिपो!
युद्धं किं न समक्षमेव तनुषे निर्णायकं भीषणम्? ३
देवानां वसुधा त्वयैव विकृता रक्तान्विता सर्वथा
बन्धूनां विनिहंसनेन बहुधा काश्मीरभू रोदिति।
रे रे दैत्य! समागतोऽसि समयस्ते मृत्युलोकार्थिनः
सज्जञ्चाक्रमणाय हन्तुमचिरं त्वां भारतीयं बलम् !! ४
योद्धुं कामयसे छलेन सततं जानन्ति सर्वे जनाः
किन्त्वेतत्स्मर भारतस्य विजयं वारत्रयं संश्रुतम्।
मुक्तस्त्वं दयया परं कुसमयस्ते मस्तके क्रीडति
चिह्नं ते वसुधातलात् स्मृतिगतं मन्यस्व कल्पिष्यते।। ५
सिन्दूरं हतवानसि प्रियमये सौभाग्यसंसूचकं
यत् तत् त्वां तु हनिष्यतीव सहसा सिन्दूरशस्त्रैरिदम्।
शौर्यं भारतशूरवीरतनुगं जानन् वृथा योधनं
कर्तुं वाञ्छसि दुष्ट! यास्यसि पुनः शीघ्रं पराजालयम्।। ६
स्थातुं नैव बलं त्वदीयमखिलं जाने क्षणं सङ्गरे
सैन्यं पश्यसि भारतीयममितं शस्त्रास्त्रभूषान्वितम्।
ब्रह्मोसं स्मर नेष्यतीव सुचिरं त्वां भूतलं सत्वरं
भिक्षापात्रमतः परं करयुगे नीत्वा न याचिष्यसे? ७
सिन्दूराक्रमणं भविष्यति मुहुस्त्वां मानचित्राद् ध्रुवं
संहर्तुं त्वरितं विनष्टसुमते! मे भारतं भाषते।
शान्तिं नैव गमिष्यसीव यदि रे! नामापि ते नो स्मृतौ
नूनं स्थास्यति हन्त मूढ! कुमते! शत्रोर्मृतिः संसृतौ।। ८
सिन्दूरं भूषणं भव्यं सिन्दूरं भाग्यसूचकम्।
सिन्दूरं विश्रुतं शौर्यं सिन्दूरं विजयास्पदम्।। ९

अथ आतङ्किस्तानाशनाष्टकम्

## आपरेशन-सिन्दूरम्



डॉ-शशिकान्ततिवारीः शशिधरः
सहायक प्रोफेसर
राजकीय संस्कृत
महाविद्यालय
काजीपुर पटना-०४

रे दुष्टनीचखलधूर्तपिशाचपापिन्!
आतङ्कवादपरिपालनदत्तचित्त!।
जानासि नैव नवभारतदिव्यशक्तिं
न स्थास्यसीह भुवि नैव च मानचित्रे।।०१।।
रे कर्महीन-धनहीन-सुबुद्धिहीन!
प्राणान्प्रपाहि ननु भारतसैनिकेभ्यः।
त्वं वै शृगालशिशुरेव वयं मृगेन्द्राः
न स्थास्यसीह भुवि नैव च मानचित्रे।।०२।।
रे नीच! नैजनवजातशिशुं स्वकीयं
आतंकवादपथि चोदयसीह नित्यम्।
न प्राप्स्यसि स्वशवदाहनकब्रभूमिं
न स्थास्यसीह भुवि नैव च मानचित्रे।।०३।।
रे धूर्त रिक्तकरमेव जनं विलोक्य
पृष्ट्वा च धर्ममथ जातिमहो जनेषु।
त्वं पापिदुष्ट! हतवान् ननु हिन्दुपुत्रं
न स्थास्यसीह भुवि नैव च मानचित्रे।।०४।।
त्वं कातरोसि ननु ते भविता चिकित्सा
आकादयोपि तव मृत्युमुखं च शीघ्रम्।
यास्यन्ति भारतमिदं कुरुते प्रतीक्षां
न स्थास्यसीह भुवि नैव च मानचित्रे।।०५।।
भोक्तुं न किञ्चिदपि नैव च पातुमेवं
पार्श्वे तवास्ति वदसीह तथापि तिक्तम्।
आकारयेर्न निजकालमहो! दरिद्र!
न स्थास्यसीह भुवि नैव च मानचित्रे।।०६।।
रे धूर्त! नैजजनताविषये विचिन्तां
कुर्या न वस्त्रमपि सम्भवमस्ति देहे।
स्थित्वापि शीशभवने क्षिपसीह शैलं
न स्थास्यसीह भुवि नैव च मानचित्रे।।०७।।
आदौ करोमि नहि युद्धगतं प्रहारं
कुर्वे परं हि प्रतिशोधमहो विशिष्टम्।
जानीहि नाशनमहो निकटं त्वदीयं
न स्थास्यसीह भुवि नैव च मानचित्रे।।०८।।
सिन्दूरनामकाद्युद्धादातङ्किस्ताननाशनात्।
सिन्दूरमूल्यकं सर्वं ज्ञापयिष्यति भारतम्।।।

# सिन्दूरस्य महन्मूल्यं भारतेस्ति युगे युगे



प्रो.बनमाली बिश्वालः

शौर्यं च भारतीयानां दृष्टं वै विश्ववासिभिः।
पाकिस्तानस्य गर्वश्च चूर्णीभूतोद्य सर्वथा ।।
राष्ट्रस्य सैन्यसामर्थ्यैः पाकिस्तानं विकम्पितम्।
विरामं भिक्षते युद्धात् स्वीकृत्य स्वपराजयम्।।
युद्धे प्रदर्शितं शौर्यं स्वशक्त्या पुरुषैर्यथा।
नारीशक्तेश्च सेनायां सामर्थ्यं वै प्रमाणितम्।।
सोफिया-व्योमिकाभ्यां च वायुसेना पुरस्कृता।
नवातंकनिवासैश्च मृताश्चातंकवादिनः।।
आतंकिनो न कस्यापि राष्ट्रस्य हितचिन्तकाः।
संस्कृत्या भोगवादिन्या सन्ति ये च प्रभाविताः।।
यत्र स्वार्थां न सिद्ध्यन्ति भस्मासुरा भवन्ति ते।
अतस्तेषु न विश्वासः कर्तव्यो वै मनागपि।।
देशाः ये केपि कुर्वन्ति चातंकिनां समर्थनम्।
किं जानन्ति न ते सर्वे स्वयमातंकवादिनः।।
दुष्टास्ते च सदा बोध्याः स्वभाषाभिर्न संशयः।
पादप्रहारयोग्याः किं परितुष्यन्ति भाषया।।
काश्मीरे चैव भूस्वर्गे पहलगामसंज्ञके।
हिन्दूपर्यटकांश्चित्वा हतवन्तश्च राक्षसाः।।
यैस्सौभाग्यवतीनां च सिन्दूरं मस्तकाद्धृतम्।
तन्नाम्ना सर्वकारेण युद्धसंचालनं कृतम्।।
नौसेना वायुसेना नस्स्थलसेना बलीयसी।
सेनाभिश्चैव सर्वाभिः प्रदर्शितः पराक्रमः।।
आग्नेयास्त्राणि शत्रूणां चूर्णीभूतानि सर्वथा।
मानसिकस्तरे तेषां सम्यग्जातः पराभवः।।
न प्राप्तं समयेनैव यतोन्येषां समर्थनम्।
पाकिस्तानेन चागत्य प्रार्थितं शरणं भयात्।।
एवं वीरवधूनां च मर्यादा परिरक्षिता।
सिन्दूरस्य महन्मूल्यं भारतेस्ति युगे युगे।।
प्रथमं राष्ट्रमेवास्ति व्यष्टिस्वार्थस्ततः परम्।
राष्ट्रं सुरक्षितं यत्र रक्षिता राष्ट्रवासिनः।।

## राजते सर्वरत्नानामाकरस्सागरो महान्

स्वसौन्दर्यैस्समुद्रोयं सर्वान्वशीकरोत्यहो।
समर्थो विवशीकर्तुं परावर्त्यावलोकितुम्।।
समुद्रो मुद्रया भाति मुद्रया तरंगायितः।
लहर्यां तस्य प्रत्येकं मुद्रा काचिद् विशिष्यते।।
वर्णाश्च परिवर्तन्ते तस्य प्रतिक्षणं नवाः।
क्षणे क्षणे च नावीन्यं तत्रानुभूयते समैः।।
अर्प्यते यत् समुद्राय सर्वं प्रत्यर्पयत्यसौ।
अपरिग्रहधर्मेण दीक्षितः शाश्वतो यतिः।।
राजते सर्वरत्नानामाकरस्सागरो महान्।
मन्थनाल्लभ्यते लक्ष्मीः क्वचिद्वा लभ्यतेमृतम्।।
बिन्दुर्मिलति सिन्धौ च बिन्दौ सिन्धोश्च मेलनम्।
ब्रह्माण्डे च यथा पिण्डं ब्रह्माण्डः पिण्डके यथा।।
जीवो जीवनयुक्तोस्ति श्वासतन्त्रनियन्त्रितः।
आकाशे चेद्गतश्श्वासः शरीरं वै शवायितम्।।
महोदधिर्महानस्ति ब्रह्माण्डाकाशयोरिव।
तस्य विशालतां दृष्ट्वा व्यक्तिर्नूनं विमुह्यति।।
व्यापकता कियत्यस्ति माप्यते वा गभीरता।
आदिरस्य समुद्रस्य क्वास्तीति विस्मयामहे।।
को वात्र केन रागेण रंजयति च सागरम्।
उपदेष्टापि कश्चात्र प्रेरितः परमात्मना।।
सर्वान् प्रसादयित्वायं प्रसीदति स्वयं पुनः।
तुलनास्य न चान्येन सागरस्सागरोपमः।।

## सिन्दूररक्षणम्



सिन्दूरं राजते भाले स्त्रीणां सौभाग्यवर्धकम्।
सदा तद्रक्षणे दक्षा सम्मानार्हा हि सैनिका।।१।।

-डॉ.राजकुमार शाण्डिल्यः
हिन्दीप्रवक्ता
चण्डीगढ़

**संस्कृत-व्याख्या-**
स्त्रीणां सौभाग्यवर्धकं सिन्दूरं तासां भाले राजते ।
सम्मानार्हाः सैनिकाः हि सदा तत् (सिन्दूरस्य) रक्षणे दक्षाः।
धर्मं पृष्ट्वा हता दुष्टैर्हिन्दूधर्मावलम्बिनः।
वीरांगनासु हा कीदृक् कष्टमापतितं महत्।।२।।

**संस्कृत-व्याख्या-**
दुष्टैः (मुस्लिम आतंकवादिभिः)धर्मं पृष्ट्वा हिन्दूधर्मावलम्बिनः हताः।
हा! वीरांगनासु कीदृक् महत् कष्टमापतितम् ।
विश्वेऽखिले हि विख्यातो नरेन्द्रो राष्ट्रनायकः।
धन्यास्ते सैनिका धीरास्तत्पराः राष्ट्ररक्षणे।।३।।

**संस्कृत-व्याख्या-**
राष्ट्रनायकः नरेन्द्रः मोदी स्वबुद्धिकौशलेन राष्ट्रप्रेम्णा निर्णयैः मानवहित कार्यैश्च विश्वस्मिन् विश्वे विख्यातोऽस्ति।
अस्माकं देशस्य धैर्यशालिनः सैनिकाः अपिधन्याः ये प्राणैरपि राष्ट्ररक्षणे तत्पराः सन्ति।

# दश-दिवसीय-संस्कृतसम्भाषण-शिविरकार्यशालाया सम्पन्ना

अजयकुमार-आर्य:

लुधियाना पञ्जाबराज्यम् । गुरु-हरगोबिन्द आयुर्वेदिकचिकित्सालयः चिकित्सकीयमहाविद्यालयश्च ( रायकोट-लुधियाना ) एवं संस्कृतभारती



पञ्जाबप्रान्तः उभयोः संयुक्ततत्त्वाधाने आयोजितायाःदश-दिवसीय-संस्कृतसम्भाषण-कार्यशाला निष्पन्ना। समापनकार्यक्रमस्य शुभारम्भः दीपप्रज्वालनेन एवञ्च दीपमन्त्रेण जातम्। कार्यक्रमे छात्रछात्राभिः सरस्वतीवन्दना, सङ्कल्पः,गीतम्, अनुभवकथनम्, नाटकादि कार्यक्रमाः प्रस्तुताः। डॉ. राजकुमारेण आगतानाम् अतिथीनां परिचयं कारितम्। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण श्रीमन् अजयकुमारआर्यः संस्कृतभारती, पञ्जाबप्रान्तमन्त्रीवर्यः आसीत् । महोदयेन 'आयुर्वेदिक पद्धत्यां वैद्यानां कृते संस्कृतं किमर्थम् आवश्यकम्' विषये निजविचाराः प्रस्तुताः। महोदयेन उक्तं यत् आयुर्वेदस्य मूलग्रन्थाः संस्कृत-भाषायां सन्ति, श्लोकानां अर्थं ज्ञातुं संस्कृतम् आवश्यकम् अस्ति। कार्यक्रमेऽस्मिन् डॉ. ओमनदीपमहोदयः मुख्यवक्ता रूपेण आसीत्। महोदयेन संस्कृतं किमर्थम् आवश्यकम् इत्यस्मिन् विषये उक्तम् । संस्कृतम् आयुर्वेदस्य मूलम् अस्ति तथा वयं संस्कृतं अग्रे नेतुं किं-किं कर्तुं शक्नुमः इत्यस्मिन् विषये निजविचाराः समुपस्थिताः । अस्मिन्नवसरे प्राचार्येन डॉ. तेजबीरेण आगतानाम् अतिथीनाम् उपहारेण स्वागतं कृतम् । तथा महोदयेन उक्तं यत् एतादृशानि शिबिराणि पुनः यदा समयः मेलिष्यति चेत् निश्चयेन चालिष्यामः। महाविद्यालयस्य प्रधानः डॉ. बच्चनलालबंसलमहोदयेन उक्तं यत् संस्कृतभाषा सरला तथा प्राचीना भाषा अस्ति। आयुर्वेदिक-छत्राणां कृते संस्कृतं बहु आवश्यकम् अस्ति। संस्कृतभारती तथा महविद्यालयस्य उभयोः पक्षतः छात्राणां कृते प्रमाणपत्राणि दत्तवन्तः। कार्यक्रमेऽस्मिन् ५६ प्रशिक्षुकाः भागं गृहीतवन्तः। अस्याः कार्यशालायाः संयोजकः डॉ. राजकुमारः आसीत् । कार्यक्रमेस्मिन् महाविद्यालयस्य उपप्रधानः डॉ. वरुण बंसलः, डॉ. राहुलः संस्कृतभारत्याः जिला-प्रशिक्षण-प्रमुखः, डॉ. शाही, डॉ. गीतिका बंसलः इत्यादयः समागताः आसन्।

# संस्कृतभारत्याः बठिण्डा-जनपद- गोष्ठी सम्पन्ना

-अजयकुमारआर्यः

बठिंडा पञ्जाब। संस्कृतभारतीपञ्जाबस्य बठिण्डा जनपदस्य गोष्ठी प्रान्तसहमन्त्रिणः अजयआर्यमहोदस्य अध्यक्षतायां संघकार्यालये सम्पन्ना।



गोष्ठ्याः शुभारम्भः विस्तारिकया रजन्या गीतेन अभवत्। डॉ. राहुलः ध्येयमन्त्रेण संस्कृतभारत्याः संकल्पस्य आवृत्तिः कृतवान्। अस्यां गोष्ठ्यां बठिण्डाजनपदस्य प्रबुद्धजनाः उपस्थिताः आसन्। पटियाला विभागसंयोजकः डॉ. ओमनदीपः उपस्थितैः जनैः सह "बठिण्डाजनपदे संस्कृतकार्यं कथं वर्धयेम" विषये चर्चां कृतवान्। यत्र उपस्थिताः जनाः स्वविचारान् प्रस्तुतवन्तः। बठिण्डा-जनपदे गीताशिक्षणकेन्द्रं, बालकेन्द्रं, साप्ताहिकमेलनं विषये च विस्तृता चर्चा समभवत् । डॉ. ओमनदीपः सम्बोधितवान् यत् पञ्जाबप्रान्ते संस्कृतभाषायाः प्रचाराय संवर्धनाय च जनपदस्य धरातले कार्यस्य वर्धनं करणीयम् अस्ति। तस्य कृते सुदृढ़कार्यकर्तृणाम् आवश्यकता वर्तते। यदा वयं सर्वे मिलित्वा कार्यं करिष्यामः तदैव एतत् सम्भविष्यति। प्रान्तसहमन्त्री अजयआर्यः कार्यकर्तृन् प्रेरितवान् अथ च नूतनानां दायित्वानां घोषणां च अकरोत्। दायित्वानां क्रमे डॉ. डिम्पलडोगरा जनपजसंयोजिका, अजयभारद्वाजः जनपजसहसंयोजकः, ऋतुतोमरः जनपदगीताशिक्षणकेन्द्रप्रमुखा, सरिता बठिण्डानगरबालकेन्द्रसंयोजिका, शिवानी बठिण्डानगरबालकेन्द्रसहसंयोजिका इति दायित्वानि घोषितानि । अस्मिन् अवसरे ओमपालसिंहः, दयालसिंहः, शिवाङ्गी, देवीखत्री आदयः उस्थिताः आसन्।

# दशदिवसीयसंस्कृतसम्भाषणकार्यशालायाः उद्घाटनकार्यक्रमः




दयानन्द-आयुर्वैदिकमहाविद्यालयः जालन्धर एवञ्च संस्कृतभारती पञ्जाबप्रान्तपक्षतः दशदिवसीयसंस्कृतसम्भाषणकार्यशालायाः अद्य उद्घाटनकार्यक्रमः सञ्जातम् । एषा कार्यशाला ०७/०५/२०२५ तः १७/०५/२०२५पर्यन्तं भविष्यति । उद्घाटनकार्यक्रमस्य शुभारम्भः दीपप्रज्वालनेन व धन्वन्तरिवन्दनया जातः । अस्मिन् उद्घाटनसत्रे दयानन्द-आयुर्वैदिकमहाविद्यालयस्य प्राचार्यः डॉ. चन्द्रशेखरवर्यः उपस्थितः आसीत् । प्राचार्यः महोदयः प्रमुखशिक्षिकायाः कुमारी रजन्याः स्वागतं कृतम् । महाविद्यालयस्य प्राचार्यमहोदयः स्वोद्बोधने उक्तं यत् यदि वयं संस्कृतं न जानीमः तर्हि आयुर्वेदविषये अपि शब्दस्य अर्थः न अपितु अनर्थः भवति। एतदेव कारणमस्ति यत् संस्कृतभाषा महत्त्वपूर्णा अस्ति। एषा कार्यशाला अस्माकं छात्राणां कृते लाभकारी भविष्यति, आयुर्वेदस्य आधारः संस्कृतमेव अस्ति । संस्कृतस्य ज्ञानेन विना एकः कुशलः आयुर्वेदचिकित्सकः न भवितुं शक्यते। अस्यां कार्यशालायां विस्तारिका रजनी शिक्षिकारूपेण भविष्यति । अद्य संस्कृतसम्भाषणकार्यशालायाः वातावरणं संस्कृतस्येव आसीत् । कार्यक्रमे कार्यशालायाः संयोजिका डॉ. रीटा, महाविद्यालयस्य-शिक्षकाः डॉ. विभु, सह-संयोजिका डॉ. नीशू रैना, डॉ. रिम्पलजीतकौर , डॉ. दीक्षा, रूही शर्मा, डॉ. स्मिता च उपस्थिताः आसन् । अस्यां कार्यशालायां षष्ट्याधिक-छात्राः भागं गृहीतवन्तः संस्कृताभ्यासं च कृतवन्तः ।

# गङ्गागौरवं काव्यस्य विमोचनम्

(वत्स-देशराज-शर्मा)

भगवतः परशुराम जयन्त्युत्सवे पंचकूलानगरे ब्राह्मणसभायाः



नारायणदत्त शर्मणा प्रो.राजवीर भारद्वाजेन चानेक संस्कृतविद्विभ: गणमान्यैश्च आचार्य देवकीनन्दन भट्टवर्याणां 'गङ्गागौरवम्' संस्कृतकाव्यस्य विमोचनं कृतम् । ग्रन्थोऽयं कवेः पूर्वं विरचितस्य 'गङ्गाशतकम्' काव्यस्य परिवर्धितं संस्करणमस्ति। गङ्गा अस्माकं संस्कृत्याः संवाहिका। बाल्यात् कवेः हृदि कलकलनिनादिनी गंगायाः हिमालयस्य च यत् सौन्दर्यमंकितं वर्तते तदेव काव्ये दृष्टिगोचरं भवति अत्र त्रिशताधिक श्लोकेषु अघविनाशिनी पुण्यदायिनी गङ्गायाः माहात्म्यं गंगाजलोपमं पावनं शीतलञ्चास्ति यत् पाठकेभ्यः श्रेयस्करं वर्तते ।काव्येऽस्मिन् देवभूमि उत्तराखण्डस्य पंचप्रयागानां चतुर्णां धाम्नां विविधतीर्थानां वर्णनमस्ति । अत्र श्लोकैः सह हिन्दीभाषायामनुवादोऽपि वर्तते। ग्रन्थोऽयं माधुर्यप्रसादादि गुणोपेतं इन्द्रवज्रा- उपेन्द्रवज्रा- वसन्ततिलका-शिखरिणी- शार्दूलविक्रीडितादि छन्दःसु निबद्धमलंकृतं सरसभाषायां पाठकानां चेतोहरः । मूढैः कृतघ्नैः धूर्तैः मल मूत्र अवकरादि क्षेपणेन गंगा धारा दूषिता तत् कष्टकरं चिन्तनीयं चास्ति । समदर्शी प्रकाशन गाजियावादतः प्रकाशितमिदं पुस्तकं सुसज्जितं वर्तते। अहं वैदिक विदुषे भट्टवर्येभ्यः प्रकाशकाय योगेश समदर्शी महोदयेभ्यश्च कोटिशो वर्धापनानि प्रेषयामि,तयोः दीर्घायुष्यं नैरुज्यं च कामये।

वन्दे मातरम्! वन्दे भारतम्!

## पक्वरिपो!

-डॉ. अरविन्दकुमारतिवारी

अयि पामर! नीच! कृतघ्न! रिपो!
कृतवान् किमिदं प्रतिवेशिरिपो! १

खलभावनया सह खेलसि भोः!
मदमत्सरदुर्गुणकोष! रिपो! २

मधुरं बहु जल्पसि सम्मिलितः।
किमु निन्दसि दूरगतो न रिपो! ३

शृणु भारतराष्ट्रमनार्य!सखे!
तव दुर्जनतां सहते न रिपो! ४

समवाप्य बलं परमाणुसमम्।
बहु कूर्दसि खे ज्वलितुं न रिपो! ५

भरितस्तव पापघटो विपुलः।
प्रपतिष्यसि तस्मिन् किन्न रिपो! ६

त्यज दुर्जनसङ्गमये त्वरितम्।
भज सज्जनतां खलवीर! रिपो! ७

दूयस्व न वृद्धिमवेक्ष्य सताम्।
स्मर रामशरं समयेन रिपो!! ८

अरविन्दसुगन्धितराष्ट्रमहो!
उन्नतिपथमेष्यति पक्वरिपो!! ९

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**



# अरुणाचलप्रदेशस्य राजीव-गान्धी-विश्वविद्यालये 'संस्कृतं संस्कृतिश्चः पारम्परिकभारतीयज्ञानपरम्परायां ज्ञानभण्डारस्य उत्खननम्' इति द्विदिवसीयसंस्कृतोन्मुखीकरणकार्यशाला सुसम्पन्ना

वार्ताहरः - शिवमत्रिपाठी

एषा कार्यशाला अरुणाचलप्रदेशस्य राजीव-गान्धी - विश्वविद्यालये राजीव-गान्धी-विश्वविद्यालयस्य दूरस्थ-एवम्-ऑनलाइन-शिक्षा-केन्द्रं तथा च केन्द्रीय-संस्कृत-विश्वविद्यालयस्य संस्कृताध्ययनकेन्द्रम् इत्यनयोः द्वयोः संयुक्त-तत्वावधानेन आयोजिता।




अस्यां कार्यशालायां मुख्यातिथि-रूपेण अरूणाचलविधनासभायाः मान्यमान्याः श्रीतेसाम् पोङ्क्ते वर्याः, मुख्यवक्ता-रूपेण कुमार-भास्कर-वर्मा - संस्कृतपुरतानाध्ययन-विश्वविद्यालयस्य मान्याः कुलपतयः प्रो. प्रह्लाद राजोशीवर्याः आसन। अस्याम् कार्यशालायाम् राजीव-गान्धी-विश्वविद्यालयस्य कुलपतयः प्रो.एस. के. नायकवर्याः , कुलसचिवः डॉ. एन.टि.रिकाम् वर्याः,राजीव-गान्धी-विश्वविद्यालयस्य दूरस्थ-एवम्-ऑनलाइन-शिक्षा-केन्द्रस्य निदेशकाः प्रो.आशानरिङ्गीवर्याः विश्वविद्यालयस्य वित्ताधिकारी प्रो.ओतम् पादुङ्गवर्याः,अन्ये विभागाध्यक्षाः, शिक्षकाः, शोधच्छात्राः , छात्राः च उपस्थिताः आसन्।






इयं कार्यशाला द्विस्तरीयछात्रान् कौशलविकास सम्बर्द्धनाय असीत्। प्रथमे दिवसे विश्वविद्यालय-महाविद्यालय स्तरीयछात्रेषु एवं द्वितीये दिवसे विद्यालयस्तरीय छात्रेषु संस्कृतभाषापरिचयार्थम् आसीत् ।अनेन छात्राणां कौशलविकासार्थं अनेकाः संस्कृतगतिविधयः च कारिताः।

प्रथमे दिवसे विश्वविद्यालयस्य छात्राः तु आसन् एव निर्जूलीस्थ विवेकानन्द-केन्द्र-शिक्षकप्रशिक्षणमहाविद्यालयस्य छात्राः अपि भागग्रहणं कृतवन्तः। एवञ्च द्वितीये दिवसे ओजु मिशन विद्यालयस्य छात्राणामपि संस्कृतभाषापरिचयः संस्कृतगतिविधयः च कारितवान। अस्यां कार्यशालायां छात्राणां मार्गदर्शक-रूपेण आसन् राजीव-गान्धी-विश्वविद्यालयस्थ संस्कृताध्ययनकेन्द्रस्य केन्द्रशिक्षिका टिङ्कुदेवी, एवं तेजपुरस्थ दरङ्गमहाविद्यालयस्य संस्कृतविभागस्य सहायकाचार्यः

श्रीनीलकमलपण्डितः,कुमार-भास्कर-वर्मा-संस्कृतपुरतानाध्यायन-विश्वविद्यालयस्य शोधच्छात्रा सुश्रीऋतुपर्णाशर्मा,कुमार-भास्कर-वर्मा - संस्कृतपुरतानाध्यायन-विश्वविद्यालयस्य शोधच्छात्रा सुश्रीनीतादेवी च आसन्न।

अस्यां कार्यशालायां प्रमुख उद्देश्यं आसीत् यत्। छात्राणां अंशत्वेन संस्कृतं प्रति जनानां रुचिवर्धनाय संस्कृतप्रदर्शनी अपि आसीत्। इयं कार्यशाला भव्यरूपेण आयोजिता। सम्पूर्णे अरुणाचलप्रदेशे संस्कृतविषयिनी प्रथमा कार्यशाला सकुशलसुसम्पनम् अभवत्।

---

चतुर्थपुटस्य शेषभागः **समायोजितः मईमासीयचक्रस्य...**



कार्यक्रमस्य शुभारंभः संस्थानगीतिकया जातस्तत्र सत्रसञ्चालनं समन्वयिकया राधाशर्मणा विहितम् । प्रशिक्षकेषु डॉ दिवाकरमिश्रः, पूनमसिंहः, आस्थाशुक्ला, डॉ सत्यप्रकाश मिश्रः च इत्यादयः स्वकम् अनुभवम् उक्तवन्तः। अनेन सहैव मैठाणीमहोदयेन मईमासीये चक्रविषये उदितं यत् अस्मिन् पर्याये सुभाषितानि पाठनीयानि । सुभाषितविषये जी २० सम्मेलने प्रधानमन्त्रिणा महान् आग्रहः प्रकटितः आसीत। तदीयं सविशेषम् अवधानं तत्र सुभाषितशिक्षणे लक्षितं भवति। अतः अस्मिन् पर्याये वयं विशेषेण सुभाषितानां शिक्षणे पाठने व्यवहारे अवधाने चिन्तने प्रसारणे च दत्तावधानाः भवेम।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
Owner. Printer, Publisher and Editor MANJU SHARMA, Printed by Lakshy Printers, 521/8B, Ground Floor, Gali No. 14, Adharsh, Mohalla, Maujpur, Delhi-110053
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2024-26 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।